कौशिक सूत्रम्

अथ विधिं वक्ष्यामः १ स पुनराम्नायप्रत्ययः २ आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि च ३ तद्यथा ब्राह्मणविधिरेवं कर्मलिङ्गा मन्त्राः ४ तथान्यार्थाः ५ तथा ब्राह्मणलिङ्गा मन्त्राः ६ तदभावे संप्रदायः ७ प्रमुक्तत्वाद्ब्राह्मणानाम् ८ यज्ञं व्याख्यास्यामो देवानां पितॄणां च ९ प्राङ्मुख उपांशु करोति १० यज्ञोपवीती देवानाम् ११ प्राचीनावीती पितॄणाम् १२ प्रागुदग्वा देवानाम् १३ दक्षिणा पितॄणाम् १४ प्रागुदगपवर्गं देवानाम् १५ दक्षिणप्रत्यगपवर्गं पितॄणाम् १६ सकृत्कर्म पितॄणां त्र्यवरार्धं देवानाम् १७ यथादिष्टं वा १८ अभिदक्षिणमाचारो देवानां प्रसव्यं पितॄणाम् १९ स्वाहाकारवषट्कारप्रदाना देवाः २० स्वधाकारनमस्कारप्रदानाः पितरः २१ उपमूललूनं बर्हि पितॄणाम् २२ पर्वसु देवानाम् २३ प्र यच्छ पर्शुमिति दर्भाहाराय दात्रं प्रयच्छति २४ ओषधीर्दान्तु पर्वन्नित्युपरि पर्वणां लूत्वा तूष्णीमाहृत्योत्तरतोऽग्नेरुपसादयाति २५ नाग्निं विपर्यावर्तेत २६ नान्तरा यज्ञाङ्गानि व्यवेयात् २७ दक्षिणं जानु प्रभुज्य जुहोति २८ या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका २९ या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूः ३० अद्योपवसथ इत्युपवत्स्यद्भक्तमश्नाति ३१ मधुलवणमांसमाषवर्जम् ३२ ममाग्ने वर्च इति समिध आधाय व्रतमुपैति ३३ व्रतेन त्वं व्रतपत इति वा ३४ ब्रह्मचारी व्रत्यधः शयीत ३५ प्रातर्हुतेऽग्नौ कर्मणे वां वेषाय वां सुकृताय वामिति पाणी प्रक्षाल्यापरेणाग्नेर्दर्भानास्तीर्य तेषूत्तरमानडुहं रोहितं चर्म प्राग्ग्रीवमुत्तरलोम प्रस्तीर्य पवित्रे कुरुते ३६ दर्भावप्रच्छिन्नप्रान्तौ प्रक्षाल्यानुलोममनुमार्ष्टि विष्णोर्मनसा पूते स्थ इति ३७ १

त्वं भूमिमत्येष्योजसा त्वं वेद्यां सीदसि चारुरध्वरे । त्वां पवित्रमृषयो भरन्तस्त्वं पुनीहि दुरितान्यस्मदिति पवित्रे अन्तर्धाय हविर्निर्वपति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीति १ एवमग्नीषोमाभ्यामिति २ इन्द्राग्निभ्यामित्यमावास्यायाम् ३ नित्यं पूर्वमाग्नेयम् ४ निरुप्तं पवित्राभ्यां प्रोक्षत्यमुष्मै त्वा जुष्टमिति यथादेवतम् ५ उलूखलमुसलं शूर्पं प्रक्षालितं चर्मण्याधाय व्रीहीनुलूखल ओप्यावघ्नंस्त्रि-

र्हविष्कृता वाचं विसृजति हविष्कृदा द्रवेहीति ६ अपहत्य सुफलीकृ-तान्कृत्वा त्रिः प्रक्षाल्य तण्डुलानग्ने चरुर्यज्ञियस्त्वाध्यरुक्षदिति चरुमधिद-धाति ७ शुद्धाः पूता इत्युदकमासिञ्चति ८ ब्रह्मणा शुद्धा इति तण्डुलान् ९ परि त्वाग्ने पुरं वयमिति त्रिः पर्यग्नि करोति १० नेक्षणेन त्रिः प्रदक्षिण-मुदायौति ११ अत ऊर्ध्वं यथाकामम् १२ उत्तरतोऽग्नेरुपसादयतीध्मम् १३ उत्तरं बर्हिः १४ अग्नये त्वा जुष्टं प्रोक्षामीतीध्मम् १५ पृथिव्या इति बर्हिः १६ दर्भमुष्टिमभ्युक्ष्य पश्चादग्नेः प्रागग्रं निदधात्यूर्णम्रदं प्रथस्व स्वासस्थं देवेभ्य इति १७ दर्भाणामपादाय ऋषीणां प्रस्तरोऽसीति दक्षिणतोऽग्नेर्ब्रह्मासनं नि-दधाति १८ पुरस्तादग्नेरास्तीर्य तेषां मूलान्यपरेषां प्रान्तैरवच्छादयन्परिसर्पति दक्षिणेनाग्निमा पश्चार्धात् १९ परि स्तृणीहीति संप्रेष्यति २० देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिषा परिस्तृणामीति २१ एवमुत्तरतोऽयुजो धातून्कुर्वन् २२ यत्र समागच्छन्ति तद्दक्षिणोत्तरं करोति २३ स्तीर्णं प्रोक्षति हविषां त्वा जुष्टं प्रोक्षामीति २४ नानभ्युक्षितं संस्ती-र्णमुपयोगं लभेत २५ नैधोऽभ्याधानम् २६ नानुत्पूतं हविः २७ नाप्रोक्षितं यज्ञाङ्गम् २८ तस्मिन्प्रक्षालितोपवातानि निदधाति २९ स्रुवमाज्यधानीं च ३० विलीनपूतमाज्यं गृहीत्वाधिश्रृत्य पर्यग्नि कृत्वोदगुद्वास्य पश्चादग्नेरुप-साद्योदगग्राभ्यां पवित्राभ्यामुत्पुनाति ३१ विष्णोर्मनसा पूतमसि ३२ देव-स्त्वा सवितोत्पुनातु ३३ अच्छिद्रेण त्वा पवित्रेण शतधारेण सहस्रधारेण सु-प्वोत्पुनामीति तृतीयम् ३४ तूष्णीं चतुर्थम् ३५ शृतं हविरभिघारयति मध्वा समञ्जन्घृतवत्कराथेति ३६ अभिघार्योदञ्चमुद्वासयत्युद्वासयाग्नेः शृतम-कर्म हव्यमा सीद पृष्ठममृतस्य धामेति ३७ पश्चादाज्यस्य निधायालंकृत्य ममानेनोत्पुनाति ३८ अदारसृदित्यवेक्षते ३९ उत्तिष्ठतेत्यैन्द्रम् ४० अग्निर्भूम्यामिति तिसृभिरुपसमादधात्यस्मै क्षत्राणयेतमिध्ममिति वा ४१ २

युनज्मि त्वाब्रह्मणा दैव्येन हव्यायास्मै वोढवेजातवेदः
इन्धानास्त्वा सुप्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं त इति १

दक्षिणतो जाङ्गायनमुदपात्रमुपसाद्याभिमन्त्रयते तथोदपात्रं धारय यथाग्रे ब्र-ह्मणस्पतिः
सत्यधर्मा अदीधरद्देवस्य सवितुः सव इति २

अथोदकमासिञ्चति इहेत देवीरमृतं वसाना हिरण्यवर्णा अनवद्यरूपाः
आपः समुद्रो वरुणश्च राजा संपातभागान्हविषो जुषन्ताम्

इन्द्रप्रशिष्टा वरुणप्रसूता अपः समुद्राद्दिवमुद्वहन्तु
इन्द्रप्रशिष्टा वरुणप्रसूता दिवस्पृथिव्याः श्रियमा वहन्त्विति ३

ऋतं त्वा सत्येन परिषिञ्चामि जातवेद इति सह हविर्भिः पर्युक्ष्य जीवाभिराचम्योपोत्थाय वेदप्रपद्भिः प्रपद्यत ओं प्रपद्ये भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये जनत्प्रपद्य इति ४ प्रपद्य पश्चात्स्तीर्णस्य दर्भानास्तीर्याहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योऽस्मत्पाकतर इति ब्रह्मासनमन्वीक्षते ५ निरस्तः पराग्वसुः सह पाप्मना निरस्तः सोऽस्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति दक्षिणा तृणं निरस्यति ६ तदन्वालभ्य जपतीदमहमर्वाग्वसोः सदने सीदाम्यृतस्य सदने सीदामि सत्यस्य सदने सीदामीष्टस्य सदने सीदामि पूर्तस्य सदने सीदामि मामृषदेव बर्हिः स्वासस्थं त्वाध्यासदेयमूर्णम्रदमनभिशोकम् ७ विमृग्वरीमित्युपविश्यासनीयं ब्रह्मजपं जपति बृहस्पतिर्ब्रह्मा ब्रह्मसदन आसिष्यते बृहस्पते यज्ञं गोपाय यदुदुद्वत उन्निवतः शकेयमिति ८ दर्भैः स्रुवं निर्मृज्य निष्टप्तं रक्षो निष्टप्ता अरातयः प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति प्रतप्य ९

मूले स्रुवं गृहीत्वा जपति विष्णोर्हस्तोऽसि दक्षिणः पूष्णा दत्तो बृहस्पतेः
तं त्वाहं स्रुवमाददे देवानां हव्यवाहनम्

अयं स्रुवो वि दधाति होमाञ्छताक्षरच्छन्दसा जागतेन
सर्वा यज्ञस्य समनक्ति विष्ठा बार्हस्पत्येष्टिः शर्मणा दैव्येनेति १०

ओं भूः शं भूत्यै त्वा गृह्णे भूतय इति प्रथमं ग्रहं गृह्णाति ११
ओं भुवः शं पुष्ट्यै त्वा गृह्णे पुष्टय इति द्वितीयम् १२
ओं स्वः शं त्वा गृह्णे सहस्रपोषायेति तृतीयम् १३
ओं जनच्छं त्वा गृह्णेऽपरिमितपोषायेति चतुर्थम् १४

राजकर्माभिचारिकेष्वमुष्य त्वा प्राणाय गृह्णेऽपानाय व्यानाय समानायोदा-

नायेति पञ्चमम् १५ अग्नावग्निर्हृदा पूतं पुरस्ताद्युक्तो यज्ञस्य चक्षुरिति जुहोति १६ पश्चादग्नेर्मध्यदेशे समानत्र पुरस्ताद्धोमान् १७ दक्षिणेनाग्निमुदपात्र आज्याहुतीनां संपातानानयति १८ पुरस्ताद्धोम आज्यभागः संस्थितहोमः संमृद्धिः शान्तानामिति १९ एतावाज्यभागौ २० ३

वृष्णे बृहते स्वर्विदे अग्नये शुल्कं हरामि त्विषीमते । स न स्थिरान्बलवतः कृणोतु ज्योक्च नो जीवातवे दधात्वग्नये स्वाहेत्युत्तरपूर्वार्ध आग्नेयमाज्यभागं जुहोति १ दक्षिणपूर्वार्ध सोमाय त्वं सोम दिव्यो नृचक्षाः सुगाँ अस्मभ्यं पथो अनु ख्यः अभि नो गोत्रं विदुष इव नेषोऽछा नो वाचमुशतीं जिगासि सोमाय स्वाहेति २ मध्ये हविः ३ उपस्तीर्याज्यं संहताभ्यामङ्गुलिभ्यां द्विर्हविषोऽवद्यति मध्यात्पूर्वार्धाच्च ४ अवत्तमभिघार्य द्विर्हविः प्रत्यभिघारयति ५ यतोयतोऽवद्यति तदनुपूर्वम् ६ एवं सर्वाण्यवदानानि ७ अन्यत्र सौविष्ट-कृतात् ८ उदेनमुत्तरं नयेति पुरस्ताद्धोमसहतां पूर्वाम् ९ एवं पूर्वांपूर्वां संहतां जुहोति १० स्वाहान्ताभिः प्रत्यृचं होमाः ११ यामुत्तरामग्नेराज्यभागस्य जुहोति रक्षोदेवत्या सा यां दक्षिणतः सोमस्य पितृदेवत्या सा १२ तस्मादन्तरा होतव्या देवलोक एव हूयन्ते १३ यां हुत्वा पूर्वामपरां जुहोति सापक्रामन्ती स पापीयान्यजमानो भवति १४ यां परांपरां संहतां जुहोति साभिक्रामन्ती स वसीयान्यजमानो भवति १४ यामनग्नौ जुहोति सान्धा तया चक्षुर्यजमानस्य मीयते सोऽन्धंभावुको यजमानो भवति १६ यां धूमे जुहोति सा तमसि हूयते सोऽरोचको यजमानो भवति १७ यां ज्योतिष्मति जुहोति तया ब्रह्मवर्चसी भवति तस्माज्ज्योतिष्मति होतव्यम् १८ एवमस्मै क्षत्रमग्नीषोमावित्यग्नीषो-मीयस्य १९ ४

अग्नीषोमा सवेदसा सहूती वनतं गिरः
सं देवत्रा बभूवथुः

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम्
युवं सिन्धूँ रभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान्

अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम् । स प्रजया सुवीर्यं विश्व-

मायुर्व्यश्नवत् १

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः
तद्वां चेति प्र वीर्यम्

श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात्
इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता

इन्द्राग्नी अस्मान्रक्षतां यौ प्रजानां प्रजावती
स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत्

गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे
इन्द्राग्नी तद्वनेमहि स्वाहेति २ ऐन्द्राग्नस्य हविषोऽमावास्यायाम् ३ प्राक्स्विष्टकृतः पार्वणौ होमौ समृद्धिहोमाः काम्यहोमाश्च ४ पूर्णा पश्चादिति पौर्णमास्याम् ५ यत्ते देवा अकृण्वन्भागधेयमित्यमावास्यायाम् ६ आकूत्यै त्वा स्वाहा । कामाय त्वा स्वाहा । समृधे त्वा स्वाहा । आकूत्यै त्वा कामाय त्वा समृधे त्वा स्वाहा । ऋचा स्तोमं समर्धय गायत्रेण रथंतरम् । बृहद्गायत्रवर्तनि स्वाहा ७ पृथिव्यामग्नये समनमन्निति संनतिभिश्च ८ प्रजापते न त्वदेतान्यन्य इति च ९ उपस्तीर्याज्यं सर्वेषामुत्तरतः सकृत्सकृदवदाय द्विरवत्तमभिघारयति १० न हवींषि ११ आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनुप्रवोढुम् । अग्निर्विद्वान्स यजात्स इद्धोता सोऽध्वरान्स ऋतून्कल्पयात्यग्नये स्विष्टकृते स्वाहेत्युत्तरपूर्वार्धेऽवयुतं हुत्वा सर्वप्रायश्चित्तीयान्होमाञ्जुहोति १२ स्वाहेष्टेभ्यः स्वाहा । वषडनिष्टभ्यः स्वाहा । भेषजं स्विष्ट्यै स्वाहा । निष्कृतिर्दुरिष्ट्यै स्वाहा । दैवीभ्यस्तनूभ्यः स्वाहा । अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि । अयासा मनसा कृतोऽयास्यं हव्यमूहिषे । अया नो धेहि भेषजं स्वाहेत्यों स्वाहा भूः स्वाहा भुवः स्वाहा स्वः स्वाहों भूर्भुवः स्वः स्वाहेति १३ ५

यन्मे स्कन्नं मनसो जातवेदो यद्वास्कन्दद्धविषो यत्रयत्र
उत्प्रुषो विप्रुषः सं जुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहेति १ यन्मे

स्कन्नं यदस्मृतीति च स्कन्नास्मृतिहोमौ २ यदद्य त्वा प्रयतीति संस्थितहोमाः ३ मनसस्पत इत्युत्तमं चतुर्गृहीतेन ४ बर्हिराज्यशेषेऽनक्ति पृथिव्यै त्वेति मूलमन्तरिक्षाय त्वेति मध्यं दिवे त्वेत्यग्रम् ५ एवं त्रिः ६ सं बर्हिरक्तमित्यनुप्रहरति यथादेवतम् ७ स्रुवमग्नौ धारयति ८ यदाज्यधान्यां तत्संस्रावयति संस्रावभागास्तविषा बृहन्तः प्रस्तरेष्ठा बर्हिषदश्च देवाः । इमं यज्ञमभि विश्वे गृणन्तः स्वाहा देवा अमृता मादयन्तामिति ९ स्रुवोऽसि घृतादनिशितः । सपत्नक्षयणो दिवि षीद । अन्तरिक्षे सीद पृथिव्यां सीदोत्तरोऽहं भूयासमधरे मत्सपत्ना इति स्रुवं प्राग्दण्डं निदधाति १० वि मुञ्चामि ब्रह्मणा जातवेदसमग्निं होतारमजरं रथस्पृतम् । सर्वा देवानां जनिमानि विद्वान्यथाभागं वहतु हव्यमग्निरग्नये स्वाहेति समिधमादधाति ११ एधोऽसीति द्वितीयां समिदसीति तृतीयाम् १२ तेजोऽसीति मुखं विमार्ष्टि १३ दक्षिणेनाग्निं त्रीन्विष्णुक्रमान्क्रमते विष्णोः क्रमोऽसीति दक्षिणेन पादेनानुसंहरति सव्यम् १४ सूर्यस्यावृतमित्यभिदक्षिणमावर्तते १५ अगन्म स्वरित्यादित्यमीक्षते १६ इन्द्रस्य वचसा वयं मित्रस्य वरुणस्य च । ब्रह्मणा स्थापितं पात्रं पुनरुत्थापयामसीत्यपरेणाग्निमुदपात्रं परिहृत्योत्तरेणाग्निमापो हि ष्ठा मयोभुव इति मार्जयित्वा बर्हिषि पत्न्याञ्जलौ निनयति समुद्रं वः प्र हिणोमीतीदं जनास इति वा १७ वीरपत्न्यहं भूयासमिति मुखं विमार्ष्टि १८ व्रतानि व्रतपतय इति समिधमादधाति १९ सत्यं त्वर्तेनेति परिषिच्योदञ्चि हविरुच्छिष्टान्युद्वासयति २० पूर्णपात्रं दक्षिणा २१ नादक्षिणं हविः कुर्वीत यः कुरुते कृत्यामात्मनः कुरुत इति ब्राह्मणम् २२ अन्वाहार्यं ब्राह्मणान्भोजयति २३ यद्वै यज्ञस्यानन्वितं भवति तदन्वाहार्येणान्वाह्रियते २४ एतदन्वाहार्यस्यान्वाहार्यत्वम् २५ ईड्या वा अन्ये देवाः सपर्येण्या अन्ये देवाः । ईड्या देवा ब्राह्मणाः सपर्येण्याः २६ यज्ञेनैवेड्यान्प्रीणात्यन्वाहार्येण सपर्येण्यान् २७ तेऽस्योभे प्रीता यज्ञे भवन्तीति २८ इमौ दर्शपूर्णमासौ व्याख्यातौ २९ दर्शपूर्णमासाभ्यां पाकयज्ञाः ३० अथाप्यपरो हवनयोगो भवति ३१ कुम्भीपाकादेव व्युद्धारं जुहुयात् ३२ अधिश्रयणपर्यग्निकरणाभिघारणोद्वासनालंकरणोत्पवनैः संस्कृत्य ३३ अथापि श्लोकौ भवतः । आज्यभागान्तं प्राक्तन्त्रमूर्ध्वं स्विष्टकृता सह । हवींषि यज्ञ आवापो यथा तन्त्रस्य तन्तवः । पाकयज्ञान्समासाद्यैकाज्यानेकबर्हिषः । एकस्विष्टकृतः कुर्यान्नानापि सति दैवतेति ३४ एतेनैवामावास्यो व्याख्यातः ३५ ऐन्द्राग्नोऽत्र द्वितीयो भवति ३६ तयोर्व्यतिक्रमे त्वमग्ने व्रतपा

असि कामस्तदग्ने इति शान्ताः ३७ ६

अश्नात्यनादेशे स्थालीपाकः १ पुष्टिकर्मसु सारूपवत्से २ आज्यं जुहोति ३ समिधमादधाति ४ आवपति व्रीहियवतिलान् ५ भक्षयति क्षीरौदनपुरोडाशरसान् ६ मन्थौदनौ प्रयच्छति ७ पूर्वं त्रिषप्तीयम् ८ उदकचोदनाया- मुदपात्रं प्रतीयात् ९ पुरस्तादुत्तरतः संभारमाहरति १० गोरनभिप्रापाद्वनस्पतीनाम् ११ सूर्योदयनतः १२ पुरस्तादुत्तरतोऽरण्ये कर्मणां प्रयोगः १३ उत्तरत उदकान्ते प्रयुज्य कर्माण्यपां सूक्तैराप्लुत्य प्रदक्षिणमावृत्याप उपस्पृश्यानवेक्षमाणा ग्राममुदाव्रजन्ति १४ आश्यबन्ध्याप्लवनयानभक्ष्याणि संपातवन्ति १५ सर्वाण्यभिमन्त्र्याणि १६ स्त्रीव्याधितावाप्लुतावसिक्तौ शिरस्तः प्रक्रम्या प्रपदात्प्रमार्ष्टि १७ पूर्वं प्रपाद्य प्रयच्छति १८ त्रयोदश्या दयस्तिस्रो दधिमधुनि वासयित्वा बध्नाति १९ आशयति २० अन्वारब्धायाभिमन्त्रणहोमाः २१ पश्चादग्नेश्चर्मणि हविषां संस्कारः २२ आनुडुहः शकृत्पिण्डः २३ जीवघात्यं चर्म २४ अकर्णोऽश्मा २५ आप्लवनावसेचनानामाचामयति च २६ संपातवतामश्नाति न्यङ्क्ते वा २७ अभ्याधेयानां धूमं नियच्छति २८ शुचिना कर्मप्रयोगः २९ ७

पुरस्ताद्धोमवत्सु निशाकर्मसु पूर्वाह्णे यज्ञोपवीती शालानिवेशनं समूहयत्युपवत्स्यद्भक्तमशित्वा स्नातोऽहतवसनः प्रयुङ्क्ते १ स्वस्त्ययनेषु च २ इज्यानां दिश्यान्बलीन्हरति ३ प्रतिदिशमुपतिष्ठते ४ सर्वत्राधिकरणं कर्तुर्दक्षिणा ५ त्रिरुदकक्रिया ६ अनन्तराणि समानानि युक्तानि ७ शान्तं संभारम् ८ अधिकृतस्य सर्वम् ९ विशये यथान्तरम् १० प्र यच्छ पर्शुमिति दर्भलवनं प्रयच्छति ११ अरातीयोरिति तक्षति १२ यत्त्वा शिक्व इति प्रक्षालयति १३ यद्यत्कृष्ण इति मन्त्रोक्तम् १४ पलाशोदुम्बरजम्बुकाम्पीलस्रग्वङ्कशिरीषस्रक्त्यवरणबिल्वजङ्गिडकुटकगर्ह्यगलावलवेतसशिम्बलसिपुनस्यन्दनारणिकाश्मयोक्ततुन्युपूतुदारवः शान्ताः १५ चितिप्रायश्चित्तिशमीशमकासवंशाशाम्यवाकातलाशापलाशवाशाशिंशपाशिम्बलसिपुनदर्भापामार्गाकृतिलोष्टवल्मीकवपादूर्वाप्रान्तव्रीहियवाः शान्ताः १६ प्रमन्दोशीरशलल्युपधानशकधूमा जरन्तः १७ सीसनदीसीसे अयोरजांसि कृकलासशिरः सीसानि १८ दधि घृतं मधूदकमिति रसाः १९ व्रीहियवगोधूमोपवाकतिलप्रियङ्गु-

श्यामाका इति मिश्रधान्यानि २० ग्रहणमा ग्रहणात् २१ यथार्थमुदर्का-
न्योजयेत् २२ इहैव ध्रुवामेह यातु यमो मृत्युः सत्यं बृहदित्यनुवाको वा-
स्तोष्पतीयानि २३ दिव्यो गन्धर्व इमं मे अग्ने यौ ते मातेति मातृनामानि २४
स्तुवानमिदं हविर्निस्सालामरायक्षयणं शं नो देवी पृश्निपर्ण्या पश्यति
तान्सत्यौजास्त्वया पूर्वं पुरस्ताद्युक्तो रक्षोहणमित्यनुवाकश्चातनानि २५ ८

अम्बयो यन्ति शम्भुमयोभू हिरण्यवर्णा निस्सालां ये अग्नयो ब्रह्म यज्ञा-
नमित्येका तदेव मृगारसूक्तानि १ उत्तमं वर्जयित्वाप नः शोशुचदघं पुनन्तु
मा सस्रुषीर्हिमवतः प्र स्रवन्ति वायोः पूतः पवित्रेण शं च नो मयश्च
नोऽनड्वास्त्वं प्रथमं मह्यमापो वैश्वानरो रश्मिभिर्यमो मृत्युर्विश्वजित्संज्ञानं नो
यद्यन्तरिक्षे पुनर्मैत्विन्द्रियं शिवा नः शं नो वातो वात्वग्निं ब्रूमो वनस्पतीनिति
२ पृथिव्यै श्रोत्रायेति त्रिः प्रत्यासिञ्चति ३ अम्बयो यन्ति शम्भुमयोभू हिर-
ण्यवर्णाः शंतातीयं शिवा नः शं नो वातो वात्वग्निं ब्रूमो वनस्पतीनिति ४
पृथिव्यै श्रोत्रायेति त्रिः प्रत्यासिञ्चति ५ इति शान्तियुक्तानि ६ उभयतः
सावित्र्युभयतः शं नो देवी ७ अहतवासाः कंसे शान्त्युदकं करोति ८
अतिसृष्टो अपां वृषभ इत्यपोऽतिसृज्य सर्वा इमा आप ओषधय इति पृष्ट्व सर्वा
इत्याख्यात ओं बृहस्पतिप्रसूतः करवाणीत्यनुज्ञाप्यों सवितृप्रसूतः भवानि-
त्यनुज्ञातः कुर्वीत ९ पूर्वया कुर्वीतेति गार्ग्यपार्थश्रवसभागलिकाङ्कायनो-
परिबभ्रवकौशिकजाटिकायनकौरुपथयः १० अन्यतरया कुर्वीतेति युवा कौ-
शिको युव कौशिकः ११ ९

इत्यथर्ववेदे कौशिकसूत्रे प्रथमोऽध्यायः समाप्तः

पूर्वस्य मेधाजननानि १ शुकसारिकृशानां जिह्वा बध्नाति २ आशयति ३
औदुम्बरपलाशकर्कन्धूनामादधाति ४ आवपति ५ भक्षयति ६ उपाध्यायाय
भैक्षं प्रयच्छति ७ सुप्तस्य कर्णमनुमन्त्रयते ८ उपसीदञ्जपति ९ धानाः
सर्पिर्मिश्राः सर्वहुताः १० तिलमिश्रा हुत्वा प्राश्नाति ११ पुरस्तादग्नेः कल्माषं
दण्डं निहत्य पश्चादग्नेः कृष्णाजिने धाना अनुमन्त्रयते १२ सूक्तस्य पारं गत्वा
प्रयच्छति १३ सकृज्जुहोति १४ दण्डधानाजिनं ददाति १५ अहं रुद्रेभिरिति
शुक्लपुष्पहरितपुष्पे किंस्त्यनाभिपिप्पल्यौ जातरूपशकलेन प्राक्स्तनग्रहा-
त्प्राशयति १६ प्रथमप्रवदस्य मातुरुपस्थे तालुनि संपातानानयति १७ दधि-

मध्वाशयति १८ उपनीतं वाचयति वार्षशतिकं कर्म १९ त्वं नो मेधे द्यौश्च म इति भक्षयति २० आदित्यमुपतिष्ठते २१ यदग्ने तपसेत्याग्रहाण्यां भक्षयति २२ अग्निमुपतिष्ठते २३ प्रातरग्निं गिरावरगराटेषु दिवस्पृथिव्या इति संहाय मुखं विमार्ष्टि २४ १ १०

पूर्वस्य ब्रह्मचारिसांपदानि १ औदुम्बर्यादयः २ ब्रह्मचार्यावसथादुपस्त-रणान्यादधाति ३ पिपीलिकोद्वापे मेदोमधुश्यामाकेषीकतूलान्याज्यं जुहोति ४ आज्यशेषे पिपीलिकोद्वापानोप्य ग्राममेत्य सर्वहुतान् ५ ब्रह्मचारिभ्योऽन्नं धानास्तिलमिश्राः प्रयच्छति ६ एतानि ग्रामसांपदानि ७ विकार स्थूणा-मूलावतक्षणानि सभानामुपस्तरणानि ८ ग्रामीणेभ्योऽन्नम् ९ सुरां सुरापेभ्यः १० औदुम्बर्यादीनि भक्षणान्तानि सर्वसांपदानि ११ त्रिर्ज्योतिः कुरुते १२ उपतिष्ठते १३ सव्यात्पाणिहृदयाल्लोहितं रसमिश्रमश्नाति १४ पृश्निमन्थः १५ जिह्वाया उत्साद्यमक्ष्योः परिस्तरणमस्तृहणं हृदयं दूर्श उपनह्य तिस्रो रात्रीः पल्पूलने वासयति १६ चूर्णानि करोति १७ मैश्रधान्ये मन्थ ओप्य दधि मधुमिश्रमश्नाति १८ अस्मिन्वसु यदाबध्नन्नव प्राणानिति युग्मकृष्णलं वासितं बध्नाति १९ सारूपवत्सं पुरुषगात्रं द्वादशरात्रं संपातवन्तं कृत्वा-नभिमुखमश्नाति २० २ ११

कथं मह इति मादानकशृतं क्षीरौदनमश्नाति १ चमसे सरूपवत्साया दुग्धे व्रीहियवाववधाय मूर्छयित्वा मध्वासिच्याशयति २ पृथिव्यै श्रोत्रायेति जुहोति ३ वत्सो विराज इति मन्थान्तानि ४ सहृदयं तदू षु सं जानीध्वमेह यातु सं वः पृच्यन्तां सं वो मनांसि संज्ञानं न इति सांमनस्यानि ५ उदकुलिजं संपातवन्तं ग्रामं परिहृत्य मध्ये निनयति ६ एवं सुराकुलिजम् ७ त्रिहायण्या वत्सतर्याः शुक्तानि पिशितान्याशयति ८ भक्तं सुरां प्रपां संपातवत्करोति ९ पूर्वस्य ममाग्ने वर्च इति वर्चस्यानि १० औदुम्बर्यादीनि त्रीणि ११ कुमार्या दक्षिणमूरुमभिमन्त्रयते १२ वपां जुहोति १३ अग्निमुपतिष्ठते १४ प्रातरग्निं गिरावरगराटेषु दिवस्पृथिव्या इति दधिमध्वाशयति १५ कीलालमिश्रं क्षत्रियं कीलालमितरान् १६ ३ १२

हस्तिवर्चसमिति हस्तिनम् १ हास्तिदन्तं बध्नाति २ लोमानि जतुना संदिह्य

जातरूपेणापिधाप्य ३ सिंहे व्याघ्रे यशो हविरिति स्नातकसिंहव्याघ्रबस्त-कृष्णवृषभराज्ञां नाभिलोमानि ४ दशानां शान्तवृक्षाणां शकलानि ५ एतयोः प्रातरग्निं गिरावरगराटेषु दिवस्पृथिव्या इति सप्त मर्माणि स्थालीपाके पृक्तान्यश्नाति ६ अकुशलं यो ब्राह्मणो लोहितमश्नीयादिति गार्ग्यः ७ उक्तो लोममणिः ८ सर्वैराप्लावयति ९ अवसिञ्चति १० चतुरङ्गुलं तृणं रजोहरणं बिन्दुनाभिश्चोत्योपमथ्य ११ शुनि किलासमजे पलितं तृणे ज्वरो योऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तस्मिन्राजयक्ष्म इति दक्षिणा तृणं निरस्यति गन्ध-प्रवादाभिरलंकुरुते १२ ४ १३

पूर्वस्य हस्तित्रसनानि १ रथचक्रेण संपातवता प्रतिप्रवर्तयति २ याने-नाभियाति ३ वादित्रैः ४ दृतिवस्त्योरोप्य शर्कराः ५ तोत्रेण नग्नप्रच्छन्नः ६ विद्मा शरस्य मा नो विदन्नदारसृत्स्वस्तिदा अव मन्युर्निर्हस्तः परि वर्त्मान्यभिभूरिन्द्रो जयात्यभि त्वेन्द्रेति सांयामिकाणि ७ आज्यसक्तूञ्जुहोति ८ धनुरिध्मे धनुःसमिधमादधाति ९ एवमिष्विध्मे १० धनुः संपातवद्विमृज्य प्रयच्छति ११ प्रथमस्येषुपर्ययणानि १२ द्रुघ्नयार्त्नीज्यापाशतृणमूलानि बध्नाति १३ आरेऽसावित्यपनोदनानि १४ फलीकरणतुषबुसावतक्षणान्यावपति १५ अन्वाह १६ अग्निर्नः शत्रूनग्निर्नो दूत इति मोहनानि १७ ओदनेनोपयम्य फ-लीकरणानुलूखलेन जुहोति १८ एवमणून् १९ एकविंशत्या शर्कराभिः प्रतिनिष्पुनाति २० अप्वां यजते २१ संशितमिति शितिपदीं संपात-वतीमवसृजति २२ उद्बधत्सु योजयेत् २३ इममिन्द्रेति युक्तयोः प्रदानान्तानि २४ दिग्युक्ताभ्यां नमो देववधेभ्य इत्युपतिष्ठते २५ त्वया मन्यो यस्ते मन्यो इति संरम्भणानि २६ सेने समीक्षमाणो जपति २७ भाङ्गमौञ्जान्पाशानिङ्गिडा-लंकृतान्संपातवतोऽनूक्तान्सेनाक्रमेषु वपति २८ एवमामपात्राणि २९ इङ्गिडेन संप्रोक्ष्य तृणान्याङ्गिरसेनाग्निना दीपयति ३० यां धूमोऽवतनोति तां जयन्ति ३१ ५ १४

ऋधङ्मन्त्रस्तदिदासेत्याश्वत्थ्यां पात्र्यां त्रिवृति गोमयपरिचये हस्तिपृष्ठे पुरुष-शिरसि वामित्राञ्जुह्वदभिप्रक्रम्य निवपति १ वराहविहिताद्राजानो वेदिं कुर्वन्ति २ तस्यां प्रदानान्तानि ३ एकेष्वाहतस्यादहन उपसमाधाय दीर्घदण्डेन स्रुवेण रथचक्रस्य खेन समया जुहोति ४ योजनीयां श्रुत्वा

योजयेत् ५ यदि चिन्नु त्वा नमो देववधेभ्य इत्यन्वाह ६ वैश्याय प्रदानान्तानि ७ त्वया वयमित्यायुधिग्रामरये ८ नि तद्दधिष इति राज्ञोदपात्रं द्वौद्वाववेत्तयेत् ९ यन्न पश्येन्न युध्येत १० नि तद्दधिषे वनस्पतेऽया विष्ठाग्र इन्द्रो दिशश्चतस्त्र इति नवं रथं राजानं ससारथिमास्थापयति ११ ब्रह्म जज्ञानमिति जीवितविज्ञानम् १२ तिस्त्रः स्नावरज्जूरङ्गारेष्ववधाय १३ उत्कु-चतीषु कल्याणम् १४ सांग्रामिकमेता व्यादिशति मध्ये मृत्युरितरे सेने १५ पराजेष्यमाणान्मृत्युरतिवर्तते जेष्यन्तो मृत्युम् १६ अग्रेषूत्कुचत्सु मुख्या हन्यन्ते मव्येषु मध्या अन्तेष्ववरे १७ एवमिषीकाः १८ ६ १५

उच्चैर्घोष उप श्वासयेति सर्ववादित्राणि प्रज्ञाल्य तगरोशीरेण संधाव्य संपातवन्ति त्रिराहत्य प्रयच्छति १ विहृदयमित्युच्चैस्तरां हुत्वा स्त्रुवमुद्वर्तयन् २ सोमांशुं हरिणचर्मरयुत्सीव्य त्तत्रियाय बध्नाति ३ परि वर्त्मानीन्द्रो जयातीति राजा त्रिः सेनां परियाति ४ उक्तः पूवस्य सोमांशुः ५ संदानं व आदानेनेति पाशैरादानसंदानानि ६ मर्माणि त इति त्तत्रियं संनाहयति ७ अभयानामप्ययः ८ इन्द्रो मन्थत्विति ९ पूतिरज्जुरिति पूतिरज्जुमवधाय १० अश्वत्थबधकयोरग्निं मन्थति ११ धूममिति धूममनुमन्त्रयते १२ अग्निमित्यग्निम् १३ तस्मिन्नररये सपत्नत्तयणीरादधात्यश्वत्थबधकताजद्भङ्गाह्नखदिरशराणाम् १४ उक्ताः पाशाः १५ आश्वत्थानि कूटानि भाङ्गानि जालानि १६ बाधकदराडानि १७ स्वाहैभ्य इति मित्रेभ्यो जुहोति १८ दुराहामीभ्य इति सव्येनेङ्गिडममित्रेभ्यो बाधके १९ उत्तरतोऽग्नेर्लोहिताश्वत्थस्य शाखां निहत्य नीललोहिताभ्यां सूत्राभ्यां परितत्य नीललोहितेनामूनिति दत्तिणा प्रहापयति २० ये बाहव उत्तिष्ठतेति यथालिङ्गं संप्रेष्यति २१ होमाथे पृषदाज्यम् २२ प्रदानान्तानि वाप्यानि २३ वाप्यैस्त्रिषन्धीनि वज्ररूपारयर्बुदिरूपाणि २४ शितिपदीं संपातवतीं दर्भरज्ज्वा त्तत्रियायोपासङ्गदराडे बध्नाति २५ द्विती-यामस्यति २६ अस्मिन्वस्विति राष्ट्रावगमनम् २७ आनुशूकानां व्रीही-णामाव्रस्कजैः काम्पीलैः शृतं सारूपवत्समाशयति २८ अभीवर्तेनेति रथने-मिमणिमयःसीसलोहरजतताम्रवेष्टितं हेमनाभिं वासितं बद्ध्वा सूत्रोतं बर्हिषि कृत्वा संपातवन्तं प्रत्यृचं भृष्टीरभीवर्तोत्तमाभ्यामाचृतति २९ अचिक्रददा त्वा गन्निति यस्माद्राष्ट्रादवरुद्धस्तस्याशायां शयनविधं पुरोडाशं दर्भेषूदके निनय-ति ३० ततो लोष्टेन ज्योतिरायतनं संस्तीर्य त्तीरौदनमश्नाति ३१ यतो लो-

ष्टस्ततः संभाराः ३२ तिसृणां प्रातरशिते पुरोडाशे ह्वयन्ते ३३ ७ १६

भूतो भूतेष्विति राजानमभिषेद्त्यन्महानदे शान्त्युदकं करोत्यादिष्टानाम् १ स्थालीपाकं श्रपयित्वा दक्षिणतः परिगृह्याया दर्भेषु तिष्ठन्तमभिषिञ्चति २ तल्पार्षभं चर्मारोहयति ३ उदपात्रं समासिञ्चेते ४ विपरिदधाने ५ सहैव नौ सुकृतं सह दुष्कृतमिति ब्रह्मा ब्रूयात् ६ यो दुष्कृतं करवत्तस्य दुष्कृतं सुकृतं नौ सहेति ७ आशयति ८ अश्वमारोह्यापराजितां प्रतिपादयति ९ सहस्रं ग्रामवरो दक्षिणा १० विपरिधानान्तमेकराजेन व्याख्यातम् ११ तल्पे दर्भेष्वभिषिञ्चति १२ वर्षीयसि वैयाघ्रं चर्मारोहयति १३ चत्वारो राजपुत्रास्ताल्पाः पृथक्पादेषु शयनं परामृश्य सभां प्रापयन्ति १४ दासः पादौ प्रक्षालयति १५ महाशूद्र उपसिञ्चति १६ कृतसंपन्नानक्षानातृतीयं विचिनोति १७ वैश्यः सर्वस्वजैनमुपतिष्ठत उत्सृजायुष्मन्निति १८ उत्सृजामि ब्राह्मणायोत्सृजामि क्षत्रियायोत्सृजामि वैश्याय धर्मो मे जनपदे चर्यतामिति १९ प्रतिपद्यते २० आशयति २१ अश्वमारोह्यापराजितां प्रतिपादयति २२ सभामुदायाति २३ मधुमिश्रं ब्राह्मणान्भोजयति २४ रसानाशयति २५ माहिषाण्युपयाति २६ कुर्युर्गामिति गार्ग्यपार्थश्रवसौ नेति भागलिः २७ इममिन्द्र वर्धय क्षत्रियं म इति क्षत्रियं प्रातःप्रातरभिमन्त्रयते २८ उक्तं समासेचनं विपरिधानम् २९ सविता प्रसवानामिति पौरोहित्ये वत्स्यन्वैश्वलोपीः समिध आधाय ३० इन्द्र क्षत्रमिति क्षत्रियमुपनयीत ३१ तदाहुर्न क्षत्रियं सावित्रीं वाचयेदिति ३२ कथं नु तमुपनयीत यन्न वाचयेत् ३३ वाचयेदेव वाचयेदेव ३४ ८ १७

इत्यथर्ववेदे कौशिकसूत्रे द्वितीयोऽध्यायः समाप्तः

पूर्वस्य पूर्वस्यां पौर्णमास्यामस्तमित उदकान्ते कृष्णचैलपरिहितो निर्ऋतिकर्माणि प्रयुङ्क्ते १ नाव्याया दक्षिणावर्ते शापेटं निखनेत् २ अपां सूक्तैरवसिञ्चति ३ अप्सु कृष्णं जहाति ४ अहतवसन उपमुच्योपानहौ जीवघात्याया उदाव्रजति ५ प्रोष्य तामुत्तरस्यां सांपदं कुरुते ६ शापेटमालिप्याप्सु निबध्य तस्मिन्नुपसमाधाय संपातवन्तं करोति ७ अश्नाति ८ आधाय कृष्णं प्रवाहयति ९ उपमुच्य जरदुपानहौ सव्येन जरच्छत्रं दक्षिणेन शालातृणान्यादीप्य जीर्णं वीरिणमभिन्यस्यति १० अनावृतमावृत्य सकृज्जुहोति ११

सव्यं प्रहरत्युपानहौ च १२ जीर्णे वीरिण उपसमाधायायं ते योनिरिति जरत्कोष्ठाद्व्रीहीञ्छर्करामिश्रानावपति १३ आ नो भरेति धानाः १४ युक्ताभ्यां सह कोष्ठाभ्यां तृतीयाम् १५ कृष्णशकुनेः सव्यजङ्घायामङ्कमनुबध्याङ्के पुरो-डाशं प्र पतेत इत्यनावृतं प्रपादयति १६ नीलं संधाय लोहितमाच्छाद्य शुक्लं परिणह्य द्वितीययोष्णीषमङ्केनोपसाद्य सव्येन सहाङ्केनावाङप्स्वपविध्यति १७ तृतीयया छन्नं चतुर्थ्या संवीतम् १८ पूर्वस्य चित्राकर्म १९ कुलाय शृतं हरितबर्हिषमश्नाति २० अन्वक्ताः प्रादेशमात्रोरादधाति २१ नाव्ययोः सांवेद्ये पश्चादग्नेर्भूमिपरिलेखे कीलालं मुखेनाश्नाति २२ तेजोव्रतं त्रिरात्रमश्नाति २३ तद्व्रतः २४ शंभुमयोभुभ्यां ब्रह्म जज्ञानमस्य वामस्य यो रोहित उदस्य केतवो मूर्धाहं विषासहिमिति सलिलैः क्षीरौदनमश्नाति २५ मन्थान्तानि २६ द्वितीयेन प्रवत्स्यन्हविषामुपदधीत २७ अथ प्रत्येत्य २८ अथ प्रत्येत्य २९ अथ प्रार्थयमाणः ३० अथ प्रार्थयमाणः ३१ चत्वारो धायाः पलाशयष्टीनां भवन्ति ३२ दर्भाणामुपोलवानां चत्वारः ३३ तं व्यतिषक्तमष्टावरमिध्मं सात्त्रिकेऽग्नावाधायाज्येनाभिजुहुयात् ३४ धूमं नियछेत ३५ लेपं प्राश्नीयात् ३६ तमु चेन्न विन्देदय सत्त्रस्यायतने यज्ञायतनमिव कृत्वा ३७ समुद्र इत्याचक्षते कर्म ३८ १ १८

अम्बयो यन्ति शंभुमयोभुभ्यां ब्रह्म जज्ञानमा गाव एका च म इति गा लवणं पाययत्युपतापिनीः १ प्रजननकामाः २ प्रपामवरुणद्धि ३ सं सं स्रवन्त्विति नाव्याभ्यामुदकमाहरतः सर्वत उपासेचम् ४ तस्मिन्मैश्रधान्यं शृतमश्नाति ५ मन्थं वा दधिमधुमिश्रम् ६ यस्य श्रियं कामयते ततो व्रीह्याज्यपय आहार्य क्षीरौदनमश्नाति ७ तदलाभे हरितगोमयमाहार्य शोषयित्वा त्रिवृति गोमय-परिचये शृतमश्नाति ८ शेरभकेति सामुद्रमप्सु कर्म व्याख्यातम् ९ अनप-हतधाना लोहिताजाया द्रप्सेन संनीयाश्नाति १० एतावदुपैति ११ तृणानां ग्रन्थीनुद्ग्रथ्नन्नपक्रामति १२ तानुदाव्रजन्नुदपात्रस्योदपात्रेणाभिप्लावयति मुखं विमार्ष्टि १३ एह यन्तु पशवः सं वो गोष्ठेन प्रजावतीः प्रजापतिरिति गोष्ठकर्माणि १४ गृष्टेः पीयूषं श्लेष्ममिश्रमश्नाति १५ गां ददाति १६ उदपात्रं निनयति १७ समुह्य सव्येनाधिष्ठायार्धं दक्षिणेन विक्षिपति १८ सारूपवत्से शकृत्पिण्डान्गुग्गुलुलवणे प्रतिनीय पश्चादग्नेर्निखनति १९ तिसृणां प्रातरश्नाति २० विकृते संपन्नम् २१ आयमगन्नयं प्रतिसरोऽयम् मे

वरणोऽरातीयोरिति मन्त्रोक्तान्वासितान्बध्नाति २२ उत्तमस्य चतुरो जातरू-पशकलेनानुसूत्रं गमयित्वावभुज्य त्रैधं पर्यस्यति २३ एतमिध्ममित्युप-समाधाय २४ तमिमं देवता इति वासितमुल्लुप्य ब्रह्मणा तेजसेति बध्नाति २५ उत्तमो असीति मन्त्रोक्तम् २६ अक्षितास्त इति यवमणिम् २७ प्रथमा ह व्युवास सेत्यष्टक्याया वपां सर्वेण सूक्तेन त्रिर्जुहोति २८ समवत्तानां स्थालीपाकस्य २९ सहहुतानाज्यमिश्रान्हुत्वा पश्चादग्नेर्वाग्यतः संविशति ३० महाभूतानां कीर्तयन्संजिहीते ३१ २ १९

सीरा युञ्जन्तीति युगलाङ्गलं प्रतनोति १ दक्षिणमुष्टारं प्रथमं युनक्ति २ एहि पूर्णकेत्युत्तरम् ३ कीनाशा इतरान् ४

अश्विना फालं कल्पयतामुपावतु बृहस्पतिः
यथासद्बहुधान्यमयक्ष्मं बहुपूरुषमिति

फालमतिकर्षति ५ इरावानसि धार्तराष्ट्रे तव मे सत्रे राध्यतामिति प्रति-मिमीते ६ अपहताः प्रतिष्ठा इत्यपूपैः प्रतिहत्य कृषति ७ सूक्तस्य पारं गत्वा प्रयच्छति ८ तिस्रः सीताः प्राचीर्गमयन्ति कल्याणीर्वाचो वदन्तः ९ सीते वन्दामहे त्वेत्यावर्तयित्वोत्तरस्मिन्सीतान्ते पुरोडाशेनेन्द्रं यजते १० अश्विनौ स्थालीपाकेन ११ सीतायां संपातानानयन्ति १२ उदपात्र उत्तरान् १३ शष्पहविषामवधाय १४ सर्वमनक्ति १५ यत्र संपातानानयति ततो लोष्टं धारयन्तं पत्नी पृच्छत्यकृक्षतेति १६ अकृक्षामेति १७ किमाहार्षीरिति । १८ वित्तिं भूतिं पुष्टिं प्रजां पशूनन्नमन्नाद्यमिति १९ उत्तरतो मध्यमायां निवपति २० अभ्यज्योत्तरफालं प्रातरायोजनाय निदधाति २१ सीताशिरःसु दर्भाना-स्तीर्य प्लक्षोदुम्बरस्य त्रींस्त्रींश्चमसान्निदधाति २२ रसवतो दक्षिणे शष्पव-तो मध्यमे पुरोडाशवत उत्तरे २३ दर्भान्प्रत्यवभुज्य संवपति २४ सारूपवत्से शकृत्पिण्डान्गुग्गुलुलवणे प्रतिनीयाश्नाति २५ अनुडुत्सांपदम् २६ ३ २०

पयस्वतीरिति स्फातिकरणम् १ शान्तफलशिलाकृतिलोष्टवल्मीकराशिवापं त्रीणि कूदीप्रान्तानि मध्यमपलाशे दर्भेण परिवेष्ट्य राशिपल्येषु करोति २ सायं भुञ्जते ३ प्रत्यावपन्ति शेषम् ४ आ भक्तयातनात् ५ अनुमन्त्रयते ६

अयं नो नभसस्पतिरिरिति पल्येऽश्मान संप्रोह्यान्वृचं काशीनोप्यावापयति ७ आ गाव इति गा आयतीः प्रत्युत्तिष्ठति ८ प्रावृषि प्रथमधारस्येन्द्राय त्रिर्जुहोति ९ प्रजावतीरिति प्रतिष्टमाना अनुमन्त्रयते १० कर्कीप्रवादानां द्वादशदाम्नयां संपातवत्यामयं घास इह वत्सामिति मन्त्रोक्तम् ११ यस्ते शोकायेति वस्त्र-सांपदी १२ तिस्रः कूदीमयोरूर्णनाभिकुलाय परिहिता अन्वक्ता आदधाति १३ अत्यन्तेषीका मौञ्जपरिहिता मधुना प्रलिप्य चिक्कशेषु पर्यस्य १४ उत पुत्र इति ज्येष्ठं पुत्रमवसाययति १५ मितशरणः सांपदं कुरुते १६ अर्धमर्धेने-त्यार्द्रपाणी रसं ज्ञात्वा प्रयच्छति १७ शान्तशाखया प्राग्भागमपाकृत्य १८ प्रत्यग्नि परिचृतति १९ तस्या अमावास्यायां तिस्रः प्रादेशमात्रीरादधाति २० त्वे क्रतुमिति रसप्राशनी २१ रसकर्माणि कुरुते २२ स्तुष्व वर्ष्मन्निति प्राजापत्यामावास्यायामस्तमिते वल्मीकशिरसि दर्भावस्तीर्णेऽध्यधि दीपं धारयंस्त्रिर्जुहोति २३ तण्डुलसंपातानानीय रसैरुपसिच्याश्नाति २४ एवं पौर्णमास्यामाज्योतान् २५ ४ २१

ऋधङ्मन्त्रस्तदिदासेति मैश्रधान्यं भृष्टपिष्टं लोहितालंकृतं रसमिश्रमश्नाति १ अभृष्टं प्लक्षोदुम्बरस्योत्तरतोऽग्नेस्त्रिषु चमसेषु पूर्वाह्णस्य तेजसाग्रमन्नस्य प्राशि-षमिति पूर्वाह्णे २ मध्यन्दिनस्य तेजसा मध्यमन्नस्य प्राशिषमिति मध्यन्दिने ३ अपराह्णस्य तेजसा सर्वमन्नस्य प्राशिषमित्यपराह्णे ४ ऋतुमत्या स्त्रिया अङ्गुलिभ्यां लोहितम् ५ यत्क्षेत्रं कामयते तस्मिन्कीलालं दधिमधुमिश्रम ६ संवत्सरं स्त्रियमनुपेत्य शुक्त्यां रेत आनीय तण्डुलमिश्रं सप्तग्रामम् ७ द्वाद-शीममावास्येति क्षीरभक्षो भवत्यमावास्यायां दधिमधुभक्षस्तस्य मूत्र उदकद-धिमधुपल्पूलनान्यासिच्य ८

क्रव्यादं नाडी प्र विवेशाग्निं प्रजाभाङ्गिरतो माययैतौ
आवां देवी जुषाणे घृताची इममन्नाद्याय प्र
विशतं स्वाहेति ९

निशायामाग्रयणतण्डुलानुदक्यान्मधुमिश्रान्निदधात्या यवानां पक्वेः १० एवं यवानुभयान्समोप्य ११ त्रिवृति गोमयपरिचये शृतमश्नाति १२ समृद्धमिति काङ्कायनः १३ ममाग्ने वर्च इति सात्रिकानग्नीन्दर्भपूतीकभाङ्गाभिः परिस्तीर्य

गार्हपत्यशृतं सर्वेषु संपातवन्तं गार्हपत्यदेशेऽश्नाति १४ एवं पूर्वस्मि-न्नपरयोरुपसंहृत्य १५ एवं द्रोणकलशे रसानुक्तम् १६ ५ २२

यजूंषि यज्ञ इति नवशालायां सर्पिर्मधुमिश्रमश्नाति १ दोषो गायेति द्वितीयाम् २ युक्ताभ्यां तृतीयाम् ३ आनुमतीं चतुर्थीम् ४ शालामङ्गुलिभ्यां संप्रोक्ष्य गृहपत्न्यासाद उपविश्योदपात्रं निनयति ५ इहैव स्तेति वाचं विसृजते ६ ऊर्ध्वा अस्येति वार्ष्मणमौदुम्बरं मन्थप्रतिरूपमभिजुहोति ७ असंख्याता अधिशृत्य सप्तागमशष्कुलीः ८ त्वष्टा म इति प्रातर्विभुञ्ज्यमाणोऽश्नाति ९ ज्यायुं बध्नाति १० दण्डं संपातवन्तं विमृज्य धारयति ११ वायुरेना इति युक्तयोश्चित्राकर्मनिशायां संभारान्संपातवतः करोति १२ अपरेद्युर्वायुरेना इति शाखयोदकधारया गाः परिक्रामति १३ प्रथमजस्य शकलमवधायौदुम्बरे-णासिना लोहितेनेति मन्त्रोक्तम् १४ यथा चक्रुरितीक्षुकाशकाण्ड्या लोहितं निर्मृज्य रसमिश्रमश्नाति १५ सर्वमौदुम्बरम् १६ यस्येदमा रज इत्यायोज-नानामप्ययः १७ ६ २३

उच्छ्रयस्वेति बीजोपहरणम् १ आज्यमिश्रान्यवानुर्वरायां कृष्टे फालेनोद्धृत्यान्वृचं काशीन्निनयति निवपति २ अभि त्यमिति महावकाशेऽरण्य उन्नते विमिते प्राग्द्वारप्रत्यग्द्वारेष्वप्सु संपातानानयति ३ कृष्णाजिने सोमांशुन्विचिनोति ४ सोममिश्रेण संपातवन्तमश्नाति ५ आदीप्ते संपन्नम् ६ तां सवितरिति गृष्टिदाम बध्नाति ७ सं मा सिञ्चन्त्विति सर्वोदके मैश्रधान्यम् ८ दिव्यं सुपर्णमित्यृषभदण्डिनो वपयेन्द्रं यजते ९ अनुबद्ध-शिरःपादेन गोशालां चर्मणावच्छाद्यावदानकृतं ब्राह्मणान्भोजयति १० प्रोष्य समिध आदायोर्जं बिभ्रदिति गृहसंकाशे जपति ११ सव्येन समिधो दक्षिणेन शालावलोकं संस्थभ्य जपति १२ अतिव्रज्य समिध आधाय सुमङ्गलि प्रजावति सुसीमेऽहं वां गृहपतिर्जीव्यासमिति स्थूणे गृह्णात्युपतिष्ठते १३ यद्वदामीति मन्त्रोक्तम् १४ गृहपत्न्यासाद उपविश्योदपात्रं निनयति १५ इहैव स्तेति प्रवत्स्यन्नवेक्षते १६ सूयवसादिति सूयवसे पशून्निष्ठापयति १७ दूर्वाग्रैरञ्जलावप आनीय दर्शं दार्शीभिरुपतिष्ठते १८ इन्द्रस्य कुक्षिः साहस्र इत्यृषभं संपातवन्तमतिसृजति १९ रेतोधायै त्वातिसृजामि वयोधायै त्वातिसृजामि यूथत्वायै त्वातिसृजामि गणत्वायै त्वातिसृजामि सहस्रपोषायै

त्वातिसृजाम्यपरिमितपोषायै त्वातिसृ-जामि २० एतं वो युवानमिति पुराणं प्रवृत्य नवमुत्सृजते संप्रोक्षति २१ उत्तरेण पुष्टिकाम ऋषभेनेन्द्रं यजते २२ संपत्कामः श्वेतेन पौर्णमास्याम् २३ सत्यं बृहदित्याग्रहायरायाम् २४ पश्चादग्नेर्दर्भेषु खदायां सर्वहुतम् २५ द्वितीयं संपातवन्तमश्नाति २६ तृतीयस्यादितः सप्तभिर्भूमे मातरिति त्रिर्जुहोति २७ पश्चादग्नेर्दर्भेषु कशिप्वास्तीर्य विमृग्वरीमित्युपविशति २८ यास्ते शिवा इति संविशति २९ यच्छयान इति पर्यावर्तते ३० नवभिः शन्तिवेति दशम्योदा-युषेत्युपोत्तिष्ठति ३१ उद्वयमित्युत्क्रामति ३२ उदीराणा इति त्रीणि पदानि प्राङ्वोदङ्वा बाह्येनोपनिष्क्रम्य यावत्त इति वीक्षते ३३ उन्नताच्च ३४ पुरस्तादग्नेः सीरं युक्तमुदपात्रेण संपातवतावसिञ्चति ३५ आयोजनानामप्ययः ३६ यस्यां सदोहविर्धाने इति जुहोति वरो म आगमिष्यतीति ३७ यस्या-मन्नमित्युपतिष्ठते ३८ निधिं बिभ्रतीति मणिं हिरण्यकामः ३९ एवं वित्त्वा ४० यस्यां कृष्णमिति वार्षकृतस्याचामति शिरस्यानयते ४१ यं त्वा पृषती रथ इति द्यौः पृषत्यादित्यो रोहितः ४२ पृषतीं गां ददाति ४३ पृषत्या क्षीरौदनं सर्वहुतम् ४४ पुष्टिकर्मणामुपधानोपस्थानम् ४५ सलिलैः सर्व-कामः सलिलैः सर्वकामः ४६ ७ २४

इत्यथर्ववेदे कौशिकसूत्रे तृतीयोऽध्यायः समाप्तः

अथ भैषज्यानि १ लिङ्ग्युपतापो भैषज्यम् २ वचनादन्यत् ३ पूर्वस्योदपात्रेण संपातवताङ्क्ते ४ वलीर्विमार्ष्टि ५ विद्मा शरस्यादो यदिति मुञ्जशिरो रज्ज्वा बध्नाति ६ आकृतिलोष्टवल्मीकौ परिलिख्य पाययति ७ सर्पिषालिम्पति ८ अपिधमति ९ विद्मा शरस्येति प्रमेहणं बध्नाति १० आखुकिरिपूतीकमथि-तजरत्प्रमन्दसाव्रस्कान्पाययति ११ उत्तमाभ्यामास्थापयति १२ यानमा-रोहयति १३ इषुं विसृजति १४ वस्तिं विष्यति १५ वर्तिं बिभेत्ति १६ एकविंशतिं यवान्दोहन्यामद्भिरानीय द्रुघ्नीं जघने संस्तभ्य फलतोऽवसिञ्चति १७ आलबिसोलं फाणटं पाययति १८ उदावर्तिने च १९ अम्बयो यन्ति वायोः पूत इति च शान्ताः २० उत्तरस्य ससोमाः २१ चातनानामपनोद-नेन व्याख्यातम् २२ त्रपुसमुसलखदिरताष्टार्धानामादधाति २३ अयुग्मा-न्खादिराञ्छङ्कूनक्ष्यौ नि विध्येति पश्चादग्नेः समं भूमि निहन्ति २४ एव-मायसलोहान् २५ तप्तशर्कराभिः शयनं राशिपल्याणि परिकिरति २६

अमावास्यायां सकृद्गृहीतान्यवाननपहतानप्रतीहारपिष्टानाभिचारिकं परिस्तीर्य तार्ष्टाघेध्म आवपति २७ य आगच्छेत्तं ब्रूयाच्छणशुल्बेन जिह्वां निर्मृजानः शालायाः प्रस्कन्देति २८ तथा कुर्वन्ननाद्ये ह्वाने २९ वीरिणतूलमिश्रमिङ्गिडं प्रपुटे जुहोति ३० इध्माबर्हिः शालायामासजति ३१ अपरेद्युर्विकृते पिशाचतो रुजति ३२ उक्तो होमः ३३ वैश्रवणायाञ्जलिं कृत्वा जपन्नाचमयत्यभ्युक्षति ३४ निश्युल्मुके संकर्षति ३५ स्वस्त्याद्यं कुरुते ३६ अयं देवानामित्ये-कविंशत्या दर्भपिञ्जूलीभिर्वलीकैः सार्धमधिशिरोऽवसिञ्चति ३७ १ २५

जरायुज इति मेदो मधु सर्पिस्तैलं पाययति १ मौञ्जप्रश्नेन शिरस्यपिहितः सव्येन तितउनि पूल्यानि धारयमाणो दक्षिणेनावकिरन्व्रजति २ सव्येन तितउप्रश्नौ दक्षिणेन ज्यां द्रुघ्नीम् ३ प्रैषकृदग्रतः ४ यत्रैनं व्याधिर्गृह्णाति तत्र तितउग्रश्नौ निदधाति ५ ज्यां च ६ आव्रजनम् ७ घृतं नस्तः ८ पञ्चपर्वणा ललाटं संस्तभ्य जपत्यमूर्या इति ९ पञ्चपर्वणा पांसुसिकताभिः परिकिरति १० अर्मकपालिकां बध्नाति ११ पाययति १२ चतुर्भिर्दूर्वा-ग्रैर्दधिपललं पाययति १३ अनु सूर्यमिति मन्त्रोक्तस्य लोममिश्रमाचमयति १४ पृष्ठे चानीय १५ शङ्कुधानं चर्मण्यासीनाय दुग्धे संपातवन्तं बध्नाति १६ पाययति १७ हरिद्रौदनभुक्तमुच्छिष्टानुच्छिष्टेना प्रपदात्प्रलिप्य मन्त्रोक्ता-नधस्तल्पे हरितसूत्रेन सव्यजङ्घासु बद्ध्वावस्नापयति १८ प्रपादयति १९ वदत उपस्थापयति २० क्रोडलोमानि जतुना संदिह्य जातरूपेणापिधाप्य २१ नक्तंजाता सुपर्णो जात इति मन्त्रोक्तं शकृदा लोहितं प्रघृष्यालिम्पति २२ पलितान्याच्छिद्य २३ मारुतान्यपिहितः २४ यदग्निरिति परशुं जपंस्तापयति क्वाथयत्यवसिञ्चति २५ उप प्रागादित्युद्विजमानस्य शुक्लप्रसूनस्य वीरिणस्य चतसृणामिषीकाणामुभयतः प्रत्युष्टं बध्नाति २६ त्रिविदग्धं काण्डमणिम् २७ उल्मुके स्वस्त्यांद्यम् २८ मातृनाम्नोः सर्वसुरभिचूर्णान्यन्वक्तानि हुत्वा शेषेण प्रलिम्पति २९ चतुष्पथे च शिरसि दर्भैरण्ड्वेऽङ्गारकपालेऽन्वक्तानि ३० तितउनि प्रतीपं गाहमानो वपतीतरोऽवसिञ्चति पश्चात् ३१ आमपात्र ओप्यासिच्य मौञ्जे त्रिपादे वयोनिवेशने प्रबध्नाति ३२ अघद्विष्टा शं नो देवी वरणः पिप्पली विद्रधस्य या बभ्रव इति ३३ उपोत्तमेन पलाशस्य चतुरङ्गुलेनालिम्पति ३४ प्रथमेन मन्त्रोक्तं बध्नाति ३५ द्वितीयेन मन्त्रोक्तस्य संपातवतानुलिम्पति ३६ तृतीयेन मन्त्रोक्तं बध्नाति ३७ चतुर्थेनाशयति ३८

पञ्चमेन वरुणगृहीतस्य मूर्ध्नि संपातानानयति ३९ उत्तमेन शाकलम् ४० उदगातामित्याप्लावयति बहिः ४१ अपेयमिति व्युछन्त्याम् ४२ बभ्रोरिति मन्त्रोक्तमाकृतिलोष्टवल्मीकौ परिलिख्य जीवकोषण्यामुत्सीव्य बध्नाति ४३ २ २६

नमस्ते लाङ्गलेभ्य इति सीरयोगमधिशिरोऽवसिञ्चति १ नमः सनिस्रसाक्षेभ्य इति शून्यशालायामप्सु संपातानानयति २ उत्तरं जरत्खाते सशालातृणे ३ तस्मिन्नाचमयत्याप्लावयति ४ दशवृक्षेति शाकलः ५ दश सुहृदो जपन्तोऽभिमृशन्ति ६ क्षेत्रियात्त्वेति चतुष्पथे काम्पीलशकलैः पर्वसु बद्ध्वा पिञ्जूलीभिराप्लावयति ७ अवसिञ्चति ८ पार्थिवस्येत्युद्यति पृष्ठसंहितावुपवेशयति ९ प्राङ्मुखं व्याधितं प्रत्यङ्मुखमव्याधितं शाखासूपवेश्य वतसे चमस उपमन्थनीभ्यां तृष्णागृहीतस्य शिरसि मन्थमुपमथ्यातृषिताय प्रयच्छति १० तस्मिंस्तृष्णां संनयति ११ उद्धृतमुदकं पाययति १२ सवासिनाविति मन्त्रोक्तम् १३ इन्द्रस्य या महीति खल्वङ्गानलाण्डून्हननान्घृतमिश्राञ्जुहोति १४ बालान्कल्माषे काण्डे सव्यं परिवेष्ट्य संभिनत्ति १५ प्रतपति १६ आदधाति १७ सव्येन दक्षिणामुखः पांसूनुपमथ्य परिकिरति १८ संमृद्नाति १९ आदधाति २० उद्यन्नादित्य इत्युद्यति गोनामेत्याहासाविति २१ सूक्तान्ते ते हता इति २२ दर्भैरभ्यस्यति २३ मध्यन्दिने च २४ प्रतीचीमपराह्णे २५ बालस्तुकामाच्छिद्य खल्वादीनि २६ अक्षीभ्यां त इति वीबर्हम् २७ उदपात्रेण संपातवतावसिञ्चति २८ हरिणस्येति बन्धनपायनाचमनशङ्कुधानज्वालेनावनक्षत्रेऽवसिञ्चति २९ अमितमात्रायाः सकृद्गृहीतान्यवानावपति ३० भक्तं प्रयच्छति ३१ मुञ्चामि त्वेति ग्राम्ये पूतिशफरीभिरोदनम् ३२ अरण्ये तिलशणगोमयशान्ताज्वालेनावनक्षत्रेऽवसिञ्चति ३३ मृगारैर्मुञ्चेत्याप्लावयति ३४ ३ २७

ब्राह्मणो जज्ञ इति तक्षकायाञ्जलिं कृत्वा जपन्नाचमयत्यभ्युक्षति १ कृमुकशकलं संक्षुद्य दूर्शजरदजिनावकरज्वालेन २ संपातवत्युदपात्र ऊर्ध्वफलाभ्यां दिग्धाभ्यां मन्थमुपमथ्य रयिधारणपिण्डानन्वृचं प्रकीर्य च्छर्दयते ३ हरिद्रां सर्पिषि पाययति ४ रोहणीत्यवनक्षत्रेऽवसिञ्चति ५ पृषातकं पाययत्यभ्यनक्ति ६ आ पश्यतीति सदंपुष्पामणिं बध्नाति ७ भवाशर्वाविति सप्त

काम्पी-लपुटानपां पूर्णान्संपातवतः कृत्वा दक्षिणेनावसिच्य पश्चादपविध्यति ८ त्वया पूर्वमिति कोशेन शमीचूर्णानि भक्ते ९ अलंकारे १० शालां परितनोति ११ उतामृतासुरित्यमतिगृहीतस्य भक्तं प्रयच्छति १२ कुष्ठलिङ्गाभिर्नवनीतमिश्रेणाप्रतीहारं प्रलिम्पति १३ लाक्षालिङ्गाभिर्दुग्धे फाण्टान्पाययति १४ ब्रह्म जज्ञानमिति सूतिकारिष्टकौ प्रपादयति १५ मन्थाचमनोपस्थानमादित्यस्य १६ दिवे स्वाहेमं यवमिति चतुर उदपात्रे संपातानानयति १७ द्वौ पृथिव्याम् १८ तौ प्रत्याहृत्याप्लावयति १९ सयवे चोत्तरेण यवं बध्नाति २० ४ २८

ददिर्हीति तक्षकायेत्युक्तम् १ द्वितीयया ग्रहणी २ सव्यं परिक्रामति ३ शिखासिचि स्तम्बानुद्ग्रथ्नाति ४ तृतीयया प्रसर्जनी ५ चतुर्थ्या दक्षिणमपेहीति दंश्म तृणैः प्रकर्ष्याहिमभिनिरस्यति ६ यतो दष्टः ७ पञ्चम्या वलीकपललज्वालेन ८ षष्ठ्यार्त्नीज्यापाशेन ९ द्वाभ्यां मधूद्वापान्पाययति १० नवम्या श्वावित्पुरीषम् ११ त्रिःशुक्लया मांसं प्राशयति १२ दशम्यालाबुनाचमयति १३ एकादश्या नाभिं बध्नाति १४ मधुलावृषलिङ्गाभिः खलतुलपर्णी संक्षुद्य मधुमन्थे पाययति १५ उत्तराभिर्भुङ्क्ते १६ द्वारं सृजति १७ अग्निस्तक्मानमिति लाजान्पाययति १८ दावे लोहितपात्रेण मूर्ध्नि संपातानानयति १९ ओते म इति करीरमूलं काण्डेनैकदेशम् २० ग्रामात्पांसून् २१ पश्चादग्नेर्मातुरुपस्थे मुसलबुध्नेन नवनीतान्वक्तेन त्रिः प्रतीहारं तालुनि तापयति २२ शिग्रुभिर्नवनीतमिश्रैः प्रदेग्धि २३ एकविंशतिमुशिराणि भिनद्मीति मन्त्रोक्तम् २४ उशीराणि प्रयच्छति २५ एकविंशत्या सहाप्लावयति २६ आ यं विशन्तीति वयोनिवेशनशृतं क्षीरौदनमश्नाति २७ परि द्यामिवेति मधु शीभं पाययति २८ जपंश्च २९ अस्थिस्रंसमिति शकलेनाप्स्विटे संपातवतावसिञ्चति ३० ५ २९

आबयो इति सार्षपं तैलसंपातं बध्नाति १ काण्डं प्रलिप्य २ पृक्तं शाकं प्रयच्छति ३ चत्वारि शाकफलानि प्रयच्छति ४ क्षीरलेहमाङ्क्ते ५ अश्नाति ६ अग्नेरिवेत्युक्तं दावे ७ इमा यास्तिस्र इति वृक्षभूमौ जाताज्वालेनावसिञ्चति ८ शीर्ष फाण्टाक्षैः ९ निकटाभ्याम् १० कृष्णं नियानमित्योषध्याभिश्चोतयते ११ मारुतानामप्ययः १२ हिमवत इति स्यन्दमानादन्वीपमाहार्य वलीकैः

१३ पञ्च च या इति पञ्च पञ्चाशतं परशुपर्णान्काष्ठैरादीपयति १४ कपाले प्रशृतं काष्ठेनालिम्पति १५ किंस्त्यश्वजाम्बीलोदकरक्षिकामशकादिभ्यां दंशयति १६ निश्यव मा पाप्मन्निति तितउनि पूल्यान्यवसिच्यापविध्य १७ अपरेद्युः सहस्राक्षायाप्सु बलींस्त्रीन्पुरोडाशसंवर्तांश्चतुष्पथेऽवक्षिप्यावकिरति १८ ६ ३०

यस्ते मद इति शमीलूनपापलक्षणयोः शमीशम्याकेनाभ्युद्य वापयति १ अधिशिरः २ अन्तर्दाव इति समन्तमग्नेः कर्ष्वामुष्णपूर्णायां जपंस्त्रिः परिक्रम्य पुरोडाशं जुहोति ३ प्राग्नये प्रेत इत्युपदधीत ४ वैश्वानरीयाभ्यां पायनानि ५ अस्थाद्द्यौरित्यपवातायाः स्वयंस्रस्तेन गोशृङ्गेण संपातवता जपन् ६ यां ते रुद्र इति शूलिने शूलम् ७ उत्सूर्य इति शमीबिम्बशीर्णपर्णावधि ८ द्यौश्च म इत्यभ्यज्यावमार्ष्टि ९ स्थूणायां निकर्षति १० इदमिद्वा इत्यक्षतं मूत्रफेनेनाभ्युद्य ११ प्रक्षिपति १२ प्रक्षालयति १३ दन्तरजसावदेग्धि १४ स्तम्बरजसा १५ अपचित आ सुस्रस इति किंस्त्यादीनि १६ लोहितलवणं संक्षुद्याभिनिष्ठीवति १७ अन्तरिक्षेणेति पक्षहतं मन्त्रोक्तं चङ्क्रमया १८ कीटेन धूपयति १९ ग्लौरित्यक्षतेन २० वीहि स्वामित्यज्ञातारुः शान्त्युदकेन संप्रोक्ष्य मनसा संपातवता २१ या ओषधय इति मन्त्रोक्तस्यौषधीभिर्धूपयति २२ मधूदश्चित्पाययति २३ क्षीरोदश्चित् २४ उभयं च २५ देवा अदुरिति वल्मीकेन बन्धनपायनाचमनप्रदेहनमुष्णेन २६ यथा मनोऽव दिव इत्यरिष्टेन २७ देवी देव्यां यां जमदग्निरिति मन्त्रोक्ताफलं जीव्यलाकाभ्याममावास्यायां कृष्णवसनः कृष्णभक्षः पुरा काकसंपातादवनक्षत्रेऽवसिञ्चति २८ ७ ३१

यस्ते स्तन इति जम्भगृहीताय स्तनं प्रयच्छति १ प्रियङ्गुतण्डुलानभ्यवदुग्धान्पाययति २ अग्नाविष्णू सोमारुद्रा सिनीवालि वि ते मुञ्चामि शुम्भनी इति मौञ्जैः पर्वसु बद्ध्वा पिञ्जूलीभिराप्लावयति ३ अवसिञ्चति ४ तिरश्चिराजेरिति मन्त्रोक्तम् ५ आकृतिलोष्टवल्मीकौ परिलिख्य ६ पायनानि ७ अपचितामिति वैणवेन दार्भ्यूषेण कृष्णोर्णाज्येन कालबुन्दै स्तुकाग्रैरिति मन्त्रोक्तम् ८ चतुर्थ्याभिनिधायाभिविध्यति ९ ज्यास्तुकाज्वालेन १० यः कीकसा इति पिशीलवीणातन्त्रीं बध्नाति ११ तन्त्र्या क्षितिकां १२ वीरिणवधों स्वयंम्लानं त्रिः समस्य १३ अप्सु त इति वहन्त्यार्मध्ये विमिते पिञ्जूली-

भिराप्लावयति १४ अवसिञ्चति १५ उष्णाः संपातवतीरसंपाताः १६ नमो रूरायेति शकुनीनिवेषीकाञ्जिमराडूकं नीललोहिताभ्यां सूत्राभ्यां सकक्षं बद्ध्वा १७ शीर्षक्तिमित्यभिमृशति १८ उत्तमाभ्यामादित्यमुपतिष्ठते १९ इन्द्रस्य प्रथम इति तक्षकायेत्युक्तम् २० पैद्वं प्रकर्ष्य दक्षिणेनाङ्गुष्ठेन दक्षिणस्यां नस्तः २१ अहिभये सिच्यवगूहयति २२ अङ्गादङ्गादित्या प्रपदात् २३ दंश्मोत्तमया निताप्याहिमभिनिरस्यति २४ यतो दष्टः २५ ओषधिवनस्पतीनामनूक्तान्यप्रतिषिद्धानि भैषज्यानाम् २६ अंहोलिङ्गाभिः २७ पूर्वस्य पुत्रकामावतोकयोरुदकान्ते शान्ता अधिशिरोऽवसिञ्चति २८ आव्रजितायै पुरोडाशप्रमन्दालंकारान्संपातवतः प्रयच्छति २९ ८ ३२

वषट्ते पूषन्निति चतुर उदपात्रे संपातानानीय चतुरो मुञ्जान्मूर्ध्नि विबृहति प्राचः १ प्रतीचीरिषीकाः २ छिद्यमानासु संशयः ३ उष्णेनाप्लावयति दक्षिणात्केशस्तुकात् ४ शालान्ग्रन्थीन्विचृतति ५ उभयतः पाशं योक्त्रमाबध्नाति ६ यदि सोमस्यासि राज्ञः सोमात्त्वा राज्ञोऽधिक्रीणामि यदि वरुणस्यासि राज्ञो वरुणात्त्वा राज्ञोऽधिक्रीणामीत्येकविंशत्या यवैः स्त्रजं परिकिरति ७ अन्या वो अन्यामवत्वन्यान्यस्या उपावत सध्रीचीः सव्रता भूत्वास्या अवत वीर्यमिति संनयति ८

मा ते रिषन्खनिता यस्मै च त्वा खनामसि
द्विपाच्चतुष्पादस्माकं मा रिषद्देव्योषधे

स्त्रजो नामासि प्रजापतिष्ट्वामखनदात्मने शल्यस्त्रंसनम् । तां त्वा वयं खनामस्यमुष्मै त्वा शल्यस्त्रंसनमित्यस्तमिते छत्रेण चान्तर्धाय फालेन खनति ९ अत्र तव राध्यतामित्यग्रमवदधाति १० इह ममेति मूलमुपयच्छति ११ एकसरेऽनुपलीढे कुमारः १२ दर्भेण परिवेष्ट्य केशेषूपचृतति १३ एवं ह विबृहशाकवृषे १४ अवपन्ने जरायुरायुपोद्धरन्ति १५ स्त्रजेनौषधिखननं व्याख्यातम् १६ चत्वार्युमाफलानि पाणावद्भिः श्चोतयते १७ संवर्तमानेषु कुमारः १८ ब्राह्मणायनोऽङ्गान्यभिमृशति १९ पुंनामधेये कुमारः २० ९ ३३

इदं जनास इत्यस्यै शिंशपाशाखासूदकान्ते शान्ता अधिशिरोऽवसिञ्चति १

आव्रजितायै २ निस्सालामित्यवतोकायै कृष्णवसनायै त्रिषु विमितेषु प्राग्द्वारप्रत्यग्द्वारेष्वप्सु संपातानानयति ३ पलाशे सीसेषूत्तरान् ४ सीसान्यधिष्ठाप्याप्लावयति ५ निधाय कृष्णं व्रजति ६ आदीप्य ब्रह्मा ७ एवं पूर्वयोः पृथक्संभार्ये ८ शाखासूक्तम् ९ पश्चादग्नेरभितः काण्डे इषीके निधायाध्यधि धायिने औदुम्बरीराधापयति १० उत्तमाव्रजितायै ११ पतिवेदनानि १२ आ नो अग्न इत्यागमकृशरमाशयति १३ मृगाखराद्वेद्यां मन्त्रोक्तानि संपातवन्ति द्वारे प्रयच्छति १४ उदकंसे व्रीहियवौ जाम्यै निशि हुत्वा दक्षिणेन प्रक्रामति १५ प्रश्चादग्नेः प्रक्षाल्य संधाव्य संपातवतीं भगस्य नावमिति मन्त्रोक्तम् १६ सप्तदाम्न्यां सपातवत्यां वत्सान्प्रत्यन्तान्प्रचृतन्तो वहन्ति १७ अहतेन संपातवता ऋषभमभ्यस्यति १८ उदर्दयति यां दिशम् १९ जाम्यै प्र यदेत इत्यागमकृशरम् २० इमा ब्रह्मेति स्वस्त्रे २१ अयमा यातीति पुरा काकसंपातादर्यम्णे जुहोति २२ अन्तःस्रक्तिषु बलीन्हरन्ति २३ आपतन्ति यतः २४ १० ३४

पुंसवनानि १ रजउद्वासायाः पुंनक्षत्रे २ येन वेहदिति बाणं मूर्ध्नि विबृहति बध्नाति ३ फालचमसे सरूपवत्साया दुग्धे व्रीहियवाववधाय मूर्छयित्वाध्यण्डे बृहतीपलाशविदर्यौ वा प्रतिनीय पैद्वमिव ४ पर्वताद्दिव इत्यागमकृशरमाशयति ५ युगतर्द्मना संपातवन्तं द्वितीयम् ६ खे लूनांश्च पलाशत्सरून्निवृत्ते निघृष्याधाय शिश्ने ग्रामं प्रविशति ७ शमीमश्वत्थ इति मन्त्रोक्तेऽग्निं मथित्वा पुंस्याः सर्पिषि पैद्वमिव ८ मधुमन्थे पाययति ९ कृष्णोर्णाभिः परिवेष्टय बध्नाति १० यन्तासीति मन्त्रोक्तं बध्नाति ११ ऋधङ्मन्त्र इत्येका यथेयं पृथिव्यच्युतेति गर्भदृंहणानि १२ जम्भगृहीताय प्रथमावर्जं ज्यां त्रिरुद्ग्रथ्य बध्नाति १३ लोष्टानन्वृचं प्राशयति १४ श्यामसिकताभिः शयनं परिकिरति १५ यामिच्छेद्वीरं जनयेदिति धातर्व्याभिरुद्रमभिमन्त्रयते १६ प्रजापतिरिति प्रजाकामाया उपस्थे जुहोति १७ लोहिताजापिशितान्याशयति १८ व्रपान्तानि १९ यौ ते मातेति मन्त्रोक्तौ बध्नाति २० यथेदं भूम्या अधि यथा वृक्षं वाञ्च मे यथायं वाह इति संस्पृष्टयोर्वृक्षलिबुजयोः शकलावन्तरेषुस्थकराञ्जनकुष्ठमदुघरेष्ममथिततृणमाज्येन संनीय संस्पृशति २१ उत्तुदस्त्वेत्यङ्गुल्योपनुदति २२ एकविंशतिं प्राचीनकण्टकानलंकृताननूक्तानादधाति २३ कूदीप्रान्तानि ससूत्राणि २४ नवनीतान्वक्तं कुष्ठं त्रिरह्नः प्रतपति त्रिरात्रे २५ दीर्घोत्पलेऽवगृह्य संविशति २६ उष्णोदकं त्रिपादे पक्तः प्रबद्धाङ्गुष्ठाभ्या-

मर्दयञ्छते २७ प्रतिकृतिमावलेखनीं दार्भ्यूषेण भाङ्गज्येन कराटकशल्ययो-लूकपत्त्रयासितालकाराडयाहृदये विध्यति २८ ११ ३५

सहस्त्रशृङ्ग इति स्वापनम् १ उदपात्रेण संपातवता शालां संप्रोन्द्यापरस्मिन्द्वारपक्षे न्युब्जति २ एवं नग्नः ३ उलूखलमुत्तरां स्त्रक्तिं दक्षिणशयनपादं तन्तूनभिमन्त्रयते ४ अस्थाद्द्यौरिति निवेष्टनम् ५ आवेष्टनेन वंशाग्रमवबध्य मध्यमायां बध्नाति ६ शयनपादमुत्पले च ७ आकृष्टे च ८ आकर्षेण तिलाञ्जुहोति ९ इदं यत्प्रेराय इति शिरःकर्णमभिमन्त्रयते १० केशान्धारयति ११ भगेन मा न्यस्तिकेदं खनामीति सौवर्चलमोषधिवच्छुक्लप्रसूनं शिरस्युपचृत्य ग्रामं प्रविशति १२ रथजितामिति माषस्मरान्निवपति १३ शरभृष्टीरादीप्ताः प्रतिदिशमभ्यस्यत्यर्वाच्या आवलेखन्याः १४ भगमस्या वर्च इति मालानिष्प्रमन्ददन्तधावनकेशमीशानहताया अनुस्तरराया वा कोशमुलूखलदरणे त्रिशिले निखनति १५ मालामुपमथ्यान्वाह १६ त्रीणि केशमराडलानि कृष्णामूत्रेन विग्रथ्य त्रिशिलेऽश्मोत्तराणि व्यत्यासम् १७

अथास्यै भगमुत्खनति यं ते भगं निचख्नुस्त्रिशिले यं चतुःशिले
इदं तमुत्खनामि प्रजया च धनेन चेति १८

इमां खनामीति बाणापर्णीं लोहिताजाया द्रप्सेन संनीय शयनमनु परिकिरति १९ अभि तेऽधामित्यधस्तात्पलाशमुपचृतति २० उप तेऽधामित्युपर्युपास्यति २१ कामं विनेष्यमाणोऽपाघेनासंख्याताः शर्कराः परिकिरन्व्रजति २२ संमृद्नञ्जपति २३ असंमृद्नन् २४ ईर्ष्याया ध्राजिं जनाद्विश्वजनीनात्त्वाष्ट्रेणाहमिति प्रतिजापः प्रदानाभिमर्शनानि २५ प्रथमेन वक्षणासु मन्त्रोक्तम् २६ अग्नेरिवेति परशुफाराटम् २७ अव ज्यामिवेति दृष्ट्वाश्मानमादत्ते २८ द्वितीययाभिनिदधाति २९ तृतीययाभिनिष्ठीवति ३० छायायां सज्यं करोति ३१ अयं दर्भ इत्योषधिवत् ३२ अग्ने जातानिति न वीरं जनयेत्प्रान्यानिति न विजातेतेत्यश्वतरीमूत्रमश्ममराडलाभ्यां संघृष्य भक्तेऽलंकारे ३३ सीमन्तमन्वीक्षते ३४ अपि वृश्चेति जायायै जारमन्वाह ३५ क्लीबपदे बाधकं धनुर्वृश्चति ३६ आशयेऽश्मानं प्रहरति ३७ तृष्टिक इति बाणापर्णीम् ३८ आ ते दद इति मन्त्रोक्तानि संस्पृशति ३९ अपि चान्वाहापि चान्वाह ४० १२ ३६

इत्यथर्ववेदे कौशिकसूत्रे चतुर्थोऽध्यायः समाप्तः

अम्बयो यन्तीति क्षीरौदनोत्कुचस्तम्बपाटाविज्ञानानि १ सांग्रामिकं वेदिविज्ञानम् २ वेनस्तदिति पञ्चपर्वेषुकुम्भकमण्डलुस्तम्बकाम्पीलशाखायुगेध्माक्षेषु पाण्योरेकविंशत्यां शर्करास्वीक्षते ३ कुम्भमहतेन परिवेष्ट्याधाय शयने विकृते संपातानतिनयति ४ अनतीकाशमवच्छाद्यारजोवित्ते कुमार्यौ येन हरेतां ततो नष्टम् ५ एवं सीरे साक्षे ६ लोष्टानां कुमारीमाह यमिच्छसि तमादत्स्वेति ७ आकृतिलोष्टवल्मीकौ कल्याणम् ८ चतुष्पथाद्बहुचारिणी ९ श्मशानान्नचिरं जीवति १० उदकाञ्जलिं निनयेत्याह ११ प्राचीनमपक्षिपन्त्यां कल्याणम् १२ १ ३७

जरायुत इति दुर्दिनमायन्प्रत्युत्तिष्ठति १ अन्वृचमुदवज्रैः २ अस्युल्मुककिष्कुरूनादाय ३ नग्नो ललाटमुन्मृजानः ४ उत्साद्य बाह्यतोऽङ्गारकपाले शिग्रुशर्करा जुहोति ५ केरार्कावादधाति ६ वर्षपरीतः प्रतिलोमकर्षितस्त्रिः परिक्रम्य खदायामर्कं क्षिप्रं संवपति ७ नमस्ते अस्तु यस्ते पृथु स्तनयित्नुरित्यशनियुक्तमपादाय ८ प्रथमस्य सोमदर्भकेशानीकुष्ठलाक्षामञ्जिष्ठीबदरहरिद्रं भूर्जशकलेन परिवेष्ट्य मन्थशिरस्युर्वरामध्ये निखनति ९ दधि नवेनाश्नात्या संहरणात् १० आशापालीयं तृतीयावर्जं दृंहणानि ११ भौमस्य दृतिकर्माणि १२ पुरोडाशानश्मोत्तरानन्तःस्त्रक्तिषु निदधाति १३ उभयान्संपातवतः १४ सभाभागधानेषु च १५ असंतापे ज्योतिरायतनस्यैकतोऽन्यं शयानो भौमं जपति १६ इयं वीरुदिति मदुघं खादन्नपराजितात्परिषदमाव्रजति १७ नेच्छत्रुरिति पाटामूलं प्रतिप्राशितम् १८ अन्वाह १९ बध्नाति २० मालां सप्तपलाशीं धारयति २१ ये भक्षयन्त इति परिषद्येकभक्तमन्वीक्षमाणो भुङ्क्ते २२ ब्रह्म जज्ञानमित्यध्यायानुपाकरिष्यन्नभिव्याहारयति २३ प्राशमाख्यास्यन् २४ ब्रह्मोद्यं वदिष्यन् २५ ममाग्ने वर्च इति विभुङ्क्ष्यमाणः प्रमत्तरज्जुं बध्नाति २६ सभा च मेति भक्षयति २७ स्थूणे गृह्णात्युपतिष्ठते २८ यद्वदामीति मन्त्रोक्तम् २९ अहमस्मीत्यपराजितात्परिषदमाव्रजति ३० २ ३८

दूष्या दूषिरसीति स्राक्त्यं बध्नाति १ पुरस्तादग्नेः पिशङ्गं गां कारयति २ पश्चादग्नेर्लोहिताजम् ३ यूषपिशितार्थम् ४ मन्त्रोक्ताः ५ वाशाकाम्पीलसितीवारसदंपुष्पा अवधाय ६ दूष्या दूषिरसि ये पुरस्तादीशानां त्वा समं ज्योतिरुतो अस्यबन्धुकृत्सुपर्णस्त्वा यां ते चक्रुरयं प्रतिसरो यां कल्पयन्तीति

महाशान्तिमावपते ७ निश्यवमुच्योष्णीष्यग्रतः प्रोक्षन्व्रजति ८ यतायै यतायै शान्तायै शान्तिवायै भद्रायै भद्रावति स्योनायै शग्मायै शिवायै सुमङ्गलि प्रजावति सुसीमेऽहं वामाभूरिति ९ अभावादपविध्यति १० कृत्यामित्रचक्षुषा समीक्षन्कृतव्यधनीत्यवलिप्तं कृत्यया विध्यति ११ उक्तावलेखनीम् १२ दूष्या दूषिरसीति दर्व्या त्रिः सारूपवत्सेनापोदकेन मथितेन गुल्फान्परिषिञ्चति १३ शकलेनावसिच्य यूषपिशितान्याशयति १४ यष्टिभिश्चर्म पिनह्य प्रैषकृत्परिक्रम्य बन्धान्मुञ्चति संदंशेन १५ अन्यत्पार्श्वी संवेशयति १६ शकलेनोक्तम् १७ अभ्यक्तेति नवनीतेन मन्त्रोक्तम् १८ दर्भरज्ज्वा संनह्योत्तिष्ठैवेत्युत्थापयति १९ सव्येन दीपं दक्षिणेनोदकालाब्वादाय वाग्यताः २० प्रैषकृदग्रतः २१ अनावृतम् २२ अगोष्पदम् २३ अनुदकखातम् २४ दक्षिणाप्रवणे वा स्वयंदीर्णे वा स्वकृते वेरिणेऽन्याशायां वा निदधाति २५ अलाबुना दीपमवसिच्य यथा सूर्य इत्यावृत्याव्रजति २६ तिष्ठंस्तिष्ठन्तीं महाशान्तिमुच्चैरभिनिगदति २७ मर्माणि संप्रोक्षन्ते २८ कृष्णसीरेण कर्षति २९ अधि सीरेभ्यो दश दक्षिणा ३० अभिचारदेशा मन्त्रेषु विज्ञायन्ते तानि मर्माणि ३१ ३ ३९

यददः संप्रयतीरिति येनेच्छेन्नदी प्रतिपद्येतेति प्रसिञ्चन्व्रजति १ काशदिविधुवकवेतसान्निमिनोति २ इदं व आप इति हिरण्यमधिदधाति ३ अयं वत्स इतीषीकाञ्जिमण्डूकं नीललोहिताभ्यां सकक्षं बद्ध्वा ४ इहेत्थमित्यवकया प्रच्छादयति ५ यत्रेदमिति निनयति ६ मारुतं क्षीरौदनं मारुतशृतं मारुतैः परिस्तीर्य मारुतेन स्रुवेण मारुतेनाज्येन वरुणाय त्रिर्जुहोति ७ उक्तमुपमन्थनम् ८ दधिमन्थं बलिं हृत्वा संप्रोक्षणीभ्यां प्रसिञ्चन्ब्रजति ९ पाणिना वेत्रेण वा प्रत्याहत्योपरि निपद्यते १० अयं ते योनिरित्यरण्योरग्निं समारोपयति ११ आत्मनि वा १२ उपावरोह जातवेदः पुनर्देवो देवेभ्यो हव्यं वह प्रजानन् । आनन्दिनो मोदमानाः सुवीरा इन्धीमहि त्वा शरदां शतानीत्युपावरोहयति १३ यां त्वा गन्धर्वो अखनद्वृषणास्ते खनितारो वृषा त्वमस्योषधे । वृषासि वृष्ण्यावति वृषणे त्वा खनामसीत्युच्छुष्मापरिष्याधावायसेन खनति १४ दुग्धे फाण्टावधिज्योपस्थ आधाय पिबति १५ मयूखे मुसले वासीनो यथासित इत्येकार्कसूत्रमार्कं बध्नाति १६ यावदङ्गीनमित्यसितस्कन्धमसितवालेन १७ आ वृषायस्वेत्युभयमप्येति १८ ४ ४०

समुत्पतन्तु प्र नभस्वेति वर्षकामो द्वादशरात्रमनुशुष्येत् १ सर्वव्रत उपश्राम्यति २ मरुतो यजते यथा वरुणं जुहोति ३ ओषधीः संपातवतीः प्रवेश्याभिन्युब्जति ४ विप्लावयेत ५ श्वशिरएटकशिरः केशजरदुपानहो वंशाग्रे प्रबध्य योधयति ६ उदपात्रेण संपातवता संप्रोन्द्यामपात्रं त्रिपादेऽश्मानमवधायाप्सु निदधाति ७ अयं ते योनिरा नो भर धीती वेत्यर्थमुत्थास्यन्नुपदधीत ८ जपति ९ पूर्वास्वषाढासु गर्तं खनति १० उत्तरासु संचिनोति ११ आदेवनं संस्तीर्य १२ उद्भिन्दतीं संजयन्तीं यथा पृन्नमशनिरिदमुग्रायेति वासितानन्नान्निवपति १३ अम्बयो यन्ति शंभुमयोभू हिरण्यवर्णा यददः पुनन्तु मा सस्रुषीर्हिमवतः प्र स्रवन्ति वायोः पूतः पवित्रेण शं च नो मयश्च नोऽनड्ड्मस्त्वं प्रथमं मह्यमापो वैश्वानरो रश्मिभिरित्यभिवर्षणावसेचनानाम् १४ उत्तमेन वाचस्पतिलिङ्गाभिरुद्यन्तमुपतिष्ठते १५ स्नातोऽहतवसनो निक्त्वाहतमाच्छादयति १६ ददाति १७ यथा मासमिति वननम् १८ वत्सं संधाव्य गोमूत्रेणावसिच्य त्रिः परिणीयोपचृतति १९ शिरःकर्णमभिमन्त्रयते २० वातरंहा इति स्नातेऽश्वे संपातानभ्यतिनयति २१ पलाशे चूर्णेषूत्तरान् २२ आचमयति २३ आप्लावयति २४ चूर्णैरवकिरति २५ त्रिरेकया चेति २६ ५ ४१

भद्रादधीति प्रवत्स्यन्नुपदधीत १ जपति २ यानं संप्रोन्द्य विमोचयति ३ द्रव्यं संपातवदुत्थापयति ४ निर्मृज्योपयच्छति ५ उभा जिग्यथुरित्यार्द्रपादाभ्यां सांमनस्यम् ६ यानेन प्रत्यञ्चौ ग्रामान्प्रतिपाद्य प्रयच्छति ७ आयातः समिध आदायोर्जं बिभ्रदित्यसंकल्पयन्नेत्य सकृदादधाति ८ ऋचं सामेत्यनुप्रवचनीयस्य जुहोति ९ युक्ताभ्यां तृतीयाम् १० आनुमतीं चतुर्थीम् ११ समावर्तनीयसमापनीययोश्चैषेज्या १२ अपो दिव्या इति पर्यवेतव्रत उदकान्ते शान्त्युदकमभिमन्त्रयते १३ अस्तमिते समित्पाणिरेत्य तृतीयावर्जं समिध आदधाति १४ इदावत्सरायेति व्रतविसर्जनमाज्यं जुहुयात् १५ समिधोऽभ्यादध्यात् १६

इदावत्सराय परिवत्सराय संवत्सराय प्रतिवेदयाम एनत्
यद्व्रतेषु दुरितं निजग्मिमो दुर्हार्दं तेन शमलेनाञ्ज्मः

यन्मे व्रतं व्रतपते लुलोभाहोरात्रे समधातां म एनत्

उद्यन्पुरस्ताद्भिषगस्तु चन्द्रमाः सूर्यो रश्मिभिरभिगृणात्वेनत्

यद्व्रतमतिपेदे चित्त्या मनसा हृदा
आदित्या रुद्रास्तन्मयि वसवश्च समिन्धताम्

व्रतानि व्रतपतय उपाकरोम्यग्नये
स मे द्युम्नं बृहद्यशो दीर्घमायुः कृणोतु म

इति व्रतसमापनीरादधाति १७ त्रिरात्रमरसाशी स्नातव्रतं चरति १८ निर्लक्ष्म्यमिति पापलक्षणाया मुखमुक्षत्यन्वृचं दक्षिणात्केशस्तुकात् १९ पलाशेन फलीकरणान्हुत्वा शेषं प्रत्यानयति २० फलीकरणतुषबुसावतक्षणानि सव्यायां पादपार्ष्ण्यां निदधाति २१ अपनोदनापाघाभ्यामन्वीक्षं प्रतिजपति २२ दीर्घायुत्वायेति मन्त्रोक्तं बध्नाति २३ ६ ४२

कर्शफस्येति पिशङ्गसूत्रमरलुदण्डं यदायुधम् १ फलीकरणैर्धूपयति २ अति धन्वानीत्यवसाननिवेशनानुचरणानि निनयनेज्या ३ वास्तोष्पतीयैः कुलिजकृष्टे दक्षिणतोऽग्नेः संभारमाहरति ४ वास्तोष्पत्यादीनि महाशान्तिमावपते ५ मध्यमे गर्ते दर्भेषु व्रीहियवमावपति ६ शान्त्युदकशष्पशर्करमन्येषु ७ इहैव ध्रुवामिति मीयमानामुच्छ्रीयमाणामनुमन्त्रयते ८ अभ्यज्यर्तेनेति मन्त्रोक्तम् ९ पूर्णं नारीत्युदकुम्भमग्निमादाय प्रपद्यन्ते १० ध्रुवाभ्यां दृंहयति ११ शंभुमयोभुभ्यां विष्यन्दयति १२

वास्तोष्पते प्रति जानीह्यस्मान्स्वावेशो अनमीवो न एधि
यत्त्वेमहे प्रति नस्तज्जुषस्व चतुष्पदो द्विपद आ वेशयेह

अनमीवो वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि न इति वास्तोष्पतये क्षीरौदनस्य जुहोति १३ सर्वान्नानि ब्राह्मणान्भोजयति १४ मङ्गल्यानि १५ ये अग्नय इति क्रव्यादनुपहत इति पालाशं बध्नाति १६ जुहोति १७ आदधाति १८ उदञ्जनेनोदपात्र्यां यवानद्भिरानीयोल्लोपम् १९ ये अग्नय इति पालाश्या दर्व्या मन्थमुपमथ्य काम्पीलीभ्यामुपमन्थनीभ्याम् २० शमनं

च २१ ७ ४३

य आत्मदा इति वशाशमनम् १ पुरस्तादग्नेः प्रतीचीं धारयन्ति २ पश्चादग्नेः प्राङ्मुख उपविश्यान्वारब्धायै शान्त्युदकं करोति ३ तत्रैतत्सूक्तमनुयोजयति ४ तेनैनामाचामयति च संप्रोक्षति च ५ तिष्ठंस्तिष्ठन्तीं महाशान्तिमुच्चैरभिनिगदति ६ य ईशे पशुपतिः पशूनामिति हुत्वा वशामनक्ति शिरसि ककुदे जघनदेशे ७ अन्यतरां स्वधितिधारामनक्ति ८ अक्तया वपामुत्खनति ९ दक्षिणे पार्श्वे दर्भाभ्यामधिक्षिपत्यमुष्मै त्वा जुष्टमिति यथादेवतम् १० निस्सालामित्युल्मुकेन त्रिः प्रसव्यं परिहरत्यनभिपरिहरन्नात्मानम् ११ दर्भाभ्यामन्वारभते १२ पश्चादुत्तरतोऽग्नेः प्रत्यक्शीर्षीमुदक्पादीं निविध्यति १३ समस्यै तन्वा भवेत्यन्यतरं दर्भमवास्यति १४ अथ प्राणानास्थापयति प्रजानन्त इति १५ दक्षिणतस्तिष्ठन्रक्षोहणं जपति १६ संज्ञप्तायां जुहोति यद्वशा मायुमक्रतोरो वा पड्भिराहत । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहस इति १७ उदपात्रेण पत्न्यभिव्रज्य मुखादीनि गात्राणि प्रक्षालयते १८ मुखं शुन्धस्व देवयज्याया इति १९ प्राणानिति नासिके २० चक्षुरिति चक्षुषी २१ श्रोत्रमिति कर्णौ २२ यत्ते क्रूरं यदास्थितमिति समन्तं रज्जुधानम् २३ चरित्राणीति पादान्समाहृत्य २४ नाभिमिति नाभिम् २५ मेढ्रमिति भेढ्रम् २६ पायुमिति पायुम् २७ यत्ते क्रूरं यदास्थितं तच्छुन्धस्वेत्यवशिष्टाः पार्श्वदेशेऽवसिच्य यथार्थं व्रजति २८ वपाश्रपण्यावाज्यं स्रुवं स्वधितिं दर्भमादायाभिव्रज्योत्तानां परिवर्त्यानुलोमं नाभिदेशे दर्भमास्तृणाति २९ ओषधे त्रायस्वैनं स्वधिते मैनं हिंसीरिति शस्त्रं प्रयच्छति ३० इदमहमामुष्यायणस्यामुष्याः पुत्रस्य प्राणापानावपकृन्तामीत्यपकृत्य ३१ अधरप्रव्रस्केन लोहितस्यापहत्य ३२ इदमहमामुष्यायणस्यामुष्याः पुत्रस्य प्राणापानौ निखनामीत्यास्ये निखनति ३३ वपया द्यावापृथिवी प्रोर्णुवाथामिति वपाश्रपण्यौ वपया प्रच्छाद्य ३४ स्वधितिना प्रकृत्योत्कृत्य ३५ आव्रस्कमभिघार्य ३६ वायवे स्तोकानामिति दर्भाग्रं प्रास्यति ३७ प्रत्युष्टं रक्ष इति चरुमङ्गारे निदधाति ३८ देवस्त्वा सविता श्रपयत्विति श्रपयति ३९ सुशृतां करोति ४० ८ ४४

यद्यष्टापदी स्याद्दर्भमञ्जलौ सहिरण्यं सयवं वा य आत्मदा इति खदायां त्र्यरत्नावग्नौ सकृज्जुहोति १ विशस्य समवत्तान्यवद्येत् २

हृदयं जिह्वा श्येनश्च दोषी पार्श्वे च तानि षट्
यकृद्वृक्कौ गुदश्रोणी तान्येकादश दैवतानि ३

दक्षिणः कपिलललाटः सव्या श्रोणिर्गुदश्च यः
एतानि त्रीणि त्र्यङ्गानि स्विष्टकृद्भाग एव ४

तदवद्य प्रज्ञातानि श्रपयेत् ५ होष्यन्द्विर्द्विर्दैवतानामवद्येत् ६ सकृत्सकृत्सौविष्टकृतानाम् ७ वपायाः समिद्ध ऊर्ध्वा अस्येति जुहोति ८ युक्ताभ्यां तृतीयाम् ९ आनुमतीं चतुर्थीम् १०

जातवेदो वपया गच्छ देवांस्त्वं हि होता प्रथमो बभूथ
घृतस्याग्ने तन्वा सं भव सत्याः सन्तु यजमानस्य कामाः स्वाहा ११

ऊर्ध्वं नभसं मारुतं गच्छतमिति वपाश्रपण्यावनुप्रहरति १२ प्राचीमेकशृङ्गां प्रतीचीं द्विशृङ्गाम् १३

पित्र्येषु वह वपां जातवेदः पितृभ्यो यत्रैतान्वेत्थ निहितान्पराके । मेदसः कुल्या उप तान्स्रवन्तु सत्या एषामाशिषः सन्तु कामाः स्वाहा स्वधेति वपायास्त्रिर्जुहोति १४ समवत्तानाम् १५

स्थालीपाकस्य सम्राडस्यधिश्रयणं नाम सखीनामभ्यहं विश्वा आशाः साक्षीय
कामोऽसि कामाय त्वा सर्ववीराय सर्वपुरुषाय सर्वगणाय सर्वकाभाय जुहोमि

अन्वद्य नोऽनुमतिः पूषा सरस्वती मही । यत्करोमि तदृध्यतामनुमतये स्वाहेति जुहोति १६ क इदं कस्मा अदात्कामस्तदग्रे यदन्नं पुनर्मैत्विन्द्रियमिति प्रतिगृह्णाति १७ उत्तमा सर्वकर्मा १८ वशया पाकयज्ञा व्याख्याताः १९
९ ४५

उतामृतासुः शिवास्त इत्यभ्याख्याताय प्रयच्छति १ द्रुघणशिरो रज्ज्वा बध्नाति

२ प्रतिरूपं पलाशायोलोहहिरण्यानाम् ३ येन सोमेति याजयिष्यन्सा- रूपवत्समश्नाति ४ निधने यजते ५ यं याचामि यदाशसेति याचिष्यन् ६ मन्त्रोक्तानि पतितेभ्यो देवाः कपोत ऋचा कपोतममून्हेतिरिति महा- शान्तिमावपते ७ परीमेऽग्निमित्यग्निं गामादाय निशि कारयमाणस्त्रिः शालां परिणयति ८ परोऽपेहि यो न जीव इति स्वप्नं दृष्ट्वा मुखं विमार्ष्टि ९ अतिघोरं दृष्ट्वा मैश्रधान्यं पुरोडाशमन्याशायां वा निदधाति १० पर्यावर्त इति पर्यावर्तते ११ यत्स्वप्न इत्यशित्वा वीक्षते १२ विद्म ते स्वप्नेति सर्वेषामप्ययः १३ नहि ते अग्ने तन्व इति ब्रह्मचार्याचार्यस्यादहन उपसमाधाय त्रिः परिक्रम्य पुरोडाशं जुहोति १४ त्रिरात्रमपर्यावर्तमानः शयीत १५ नोपशयीतेति कौ- शिकः १६ स्नानीयाभिः स्नायात् १७ अपर्यवेतव्रतः प्रत्युपेयात् १८ अव- कीर्णिने दर्भशुल्बमासज्य यत्ते देवीत्यावपति १९ एवं संपातवतोदपा- त्रेणावसिच्य २० मन्त्रोक्तं शान्त्युदकेन संप्रोक्ष्य २१ सं समिदिति स्वयं- प्रज्वलितेऽग्नौ २२ अग्नी रक्षांसि सेधतीति सेधन्तम् २३ यदस्मृतीति संदेशमपर्याप्य २४ प्रन्नो हीति पापनक्षत्रे जाताय मूलेन २५ मा ज्येष्ठं तृते देवा इति परिवित्तिपरिविविदानावुदकान्ते मौञ्जैः पर्वसु बद्ध्वा पिञ्जूली- भिराप्लावयति २६ अवसिञ्चति २७ फेनेषूत्तरान्पाशानाधाय नदीनां फेनानिति प्रप्लावयति २८ सर्वैश्च प्रविश्यापां सूक्तैः २९ देवहेडनेन मन्त्रोक्तम् ३० आचार्याय ३१ उपदधीत ३२ खदाशयस्यावपते ३३ वैवस्वतं यजते ३४ चतुःशरावं ददाति ३५ उत्तमर्णे मृते तदपत्याय प्रयच्छति ३६ सगोत्राय ३७ श्मशाने निवपति ३८ चतुष्पथे च ३९ कक्षानादीपयति ४० दिवो नु मामिति वीध्रबिन्दून्प्रक्षालयति ४१ मन्त्रोक्तैः स्पृशति ४२ यस्योत्तमदन्तौ पूर्वौ जायेते यौ व्याघ्रावित्यावपति ४३ मन्त्रोक्तान्दंशयति ४४ शान्त्यु- दकश्रृतमादिष्टानामाशयति ४५ पितरौ च ४६ इदं यत्कृष्ण इति कृष्ण- शकुनिनाधिक्षिप्तम् प्रक्षालयति ४७ उपमृष्टं पर्यग्नि करोति ४८ प्रतीचीनफल इत्यपामार्गेध्मेऽपामार्गीरादधाति ४९ यदर्वाचीनमित्याचामति ५० यत्ते भूम इति विखनति ५१ यत्त ऊनमिति संवपति ५२ प्रेहि प्र हरेति कापिञ्जलानि स्वस्त्ययनानि भवन्ति ५३

प्रेहि प्र हर वा दावान्गृहेभ्यः स्वस्तये
कपिञ्जल प्रदक्षिणं शतपत्त्राभि नो वद

भद्रम् वद दक्षिणतो भद्रमुत्तरतो वद
भद्रं पुरस्तान्नो वद भद्रं पश्चात्कपिञ्जल

शुनं वद दक्षिणतः शुनमुत्तरतो वद
शुनं पुरस्तान्नो वद शुनं पश्चात्कपिञ्जल

भद्रं वद पुत्रैर्भद्रं वद गृहेषु च
भद्रमस्माकं वद भद्रं नो अभयं वद

आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः
यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः

यौवनानि महयसि जिग्युषामिव दुन्दुभिः
कपिञ्जल प्रदक्षिणं शतपत्राभि नो वदेति कापिञ्जलानि स्वस्त्ययनानि भवन्ति ५४ यो अभ्यु बभ्रुणायसि स्वपन्तमत्सि पुरुषं शयानमगत्स्वलम् । अयस्मयेन ब्रह्मणाश्ममयेन वर्मणा पर्यस्मान्वरुणो दधदित्यभ्यवकाशे संविशत्यभ्यवकाशे संविशति ५५ १० ४६

इत्यथर्ववेदे कौशिकसूत्रे पञ्चमोऽध्यायः समाप्तः

उभयतः परिच्छिन्नं शरमयं बर्हिराभिचारिकेषु १ दक्षिणतः संभारमाहरत्याङ्गिरसम् २ इङ्गिडमाज्यम् ३ सव्यानि ४ दक्षिणापवर्गाणि ५ दक्षिणाप्रवण ईरिणे दक्षिणामुखः प्रयुङ्क्ते ६ साग्नीनि ७ अग्ने यत्ते तप इति पुरस्ताद्धोमाः ८ तथा तदग्ने कृणु जातवेद इत्याज्यभागौ ९ निरमुं नुद इति संस्थितहोमाः १० कृत्तिकारोकारोधावाप्येषु ११ भरद्वाजप्रव्रस्केनाङ्गिरसं दण्डं वृश्चति १२ मृत्योरहमिति बाधकीमादधाति १३ य इमामयं वज्र इति द्विगुणामेकवीरान्संनह्य पाशान्निमुष्टितृतीयं दण्डं संपातवत् १४ पूर्वाभिर्बध्नीते १५

वज्रोऽसि सपत्नहा त्वयाद्य वृत्रं साक्षीय
त्वामद्य वनस्पते वृक्षाणामुदयुष्महि

स न इन्द्र पुरोहितो विश्वतः पाहि रक्षसः
अभि गावो अनूषताभि द्युम्नं बृहस्पते

प्राण प्राणं त्रयस्वासो असवे मृड
निर्ऋते निर्ऋत्या नः पाशेभ्यो मुञ्च

इति दण्डमादत्ते १६ भक्तस्याहुतेन मेखलाया ग्रन्थिमालिम्पति १७ अयं वज्र इति बाह्यतो दण्डमूर्ध्वमवागग्रं तिसृभिरन्वृचं निहन्ति १८ अन्तरुप-स्पृशेत् १९ यदश्नामीति मन्त्रोक्तम् २० यत्पात्रमाहन्ति फङ्कतोऽसाविति २१ इदमहमामुष्यायणस्यामुष्याः पुत्रस्य प्राणापानावप्यायच्छामीत्यायच्छति २२ येऽमावास्यामिति संनह्य सीसचूर्णानि भक्तेऽलंकारे २३ पराभूतवेणोर्यष्ट्या बाहुमात्र्यालंकृतयाहन्ति २४ द्यावापृथिवी उर्वति परशुपलाशेन दक्षिणा धावतः पदं वृश्चति २५ अन्वक्त्रिस्तिर्यक्त्रिः २६ अक्ष्णया संस्थाप्य २७ आवस्कान्यांशून्पलाशमुपनह्य भ्रष्ट्रेऽभ्यस्यति २८ स्फोटत्सु स्तृतः २९ पश्चादग्नेः कर्ष्वां कूद्युपस्तीर्णायां द्वादशरात्रमपर्यावर्तमानः शयीत ३० तत उत्थाय त्रिरह्न उदवज्रान्प्रहरति ३१ नद्या अनामसंपन्नाया अश्मानं प्रास्यति ३२ उष्णेऽक्षतसक्तूननूपमथिताननुच्छ्वसन्पिबति ३३ कथं त्रींस्त्रीन्काशीं स्त्रिरात्रम् ३४ द्वौद्वौ त्रिरात्रम् ३५ एकैकं षड्रात्रम् ३६ द्वादश्याः प्रातः क्षीरौदनं भोजयित्वोच्छिष्टानुच्छिष्टं बहुमत्स्ये प्रकिरति ३७ संधावत्सु स्तृतः ३८ लोहितशिरसं कृकलासममून्हन्मीति हत्वा सद्यः कार्यो भाङ्गे शयने ३९ लोहितालंकृतं कृष्णवसनमनूक्तं दहति ४० एकपदाभिरन्योऽनुतिष्ठति ४१ अङ्गशः सर्वहुतमन्यम् ४२ पश्चादग्नेः शरभृष्टीर्निधायोदग्व्रजत्या स्वेदशननात् ४३ निवृत्य स्वेदालंकृता जुहोति ४४ कोश उरःशिरोऽवधाय पदात्पांसून् ४५ पश्चादग्नेर्लवणमृडीचीस्तिस्रोऽशीतीर्विकर्णीः शर्कराणाम् ४६ विषं शि-रसि ४७ बाधकेनावागग्रेण प्रणयन्नन्वाह ४८ पाशे स इति कोशे ग्रन्थीनुद्ग्रथ्नाति ४९ आमुमित्यादत्ते ५० मर्मणि खादिरेण स्रुवेण गर्तं खनति ५१ बाहुमात्तमतीव य इति शरैरवज्वालयति ५२ अवधाय संचित्य लोष्टं स्रुवेण समोप्य ५३ अमुमुन्नैषमित्युक्तावलेखनीम् ५४ छायां वा ५५ उपनिनयते ५६ अन्वाह ५७ १ ४७

भ्रातृव्यक्षयणमित्यरणये सपत्नक्षयणीरादधाति १ ग्राममेत्यावपति २ पुमान्पुंस इति मन्त्रोक्तमभिहुतालंकृतं बध्नाति ३ यावन्तः सपत्नास्तावतः पाशानि-ङ्गिडालंकृतान्संपातवतोऽनुक्तान्ससूत्रांश्चम्बा मर्मणि निखनति ४ नावि प्रैणा-न्नुदस्व कामेति मन्त्रोक्तं शाखया प्रणुदति ५ तेऽधराञ्च इति प्रप्लावयति ६ बृहन्नेषामित्यायन्तं शप्यमानमन्वाह ७ वैकङ्कतेनेति मन्त्रोक्तम् ८ ददिर्हीति साग्नीनि ९ देशकपटु प्रक्षिणाति १० तेऽवदन्निति नेतॄणां पदं वृश्चति ११ अन्वाह १२ ब्रह्मगवीभ्यामन्वाह १३ चेष्टाम् १४ विचृतति १५ ऊबध्ये १६ श्मशाने १७ त्रिरमून्हनस्वेत्याह १८ द्वितीययाश्मानमूबध्ये गूहयति १९ द्वादशरात्रं सर्वव्रत उपश्राम्यति २० द्विरुदिते स्तृतः २१ अवागग्रेण निवर्तयति २२ उप प्रागादिति शुने पिणडं पाणडु प्रयच्छति २३ तार्छं बध्नाति २४ जुहोति २५ आदधाति २६ इदं तद्युजे यत्किं चासौ मनसेत्याहिताग्निं प्रतिनिर्वपति २७ मध्यमपलाशेन फलीकरणाञ्जुहोति २८ निरमुभित्यङ्गुष्ठेन त्रिरनुप्रस्तृणाति २९ शरं कद्विन्दुकोष्ठैरनुनिर्वपति ३० लोहिताश्वत्थपलाशेन विषावध्वस्तं जुहोति ३१ त्वं वीरुधामिति मूत्रपुरीषं वत्सशेष्यायां ककुचै-रपिधाप्य संपिष्य निखनति ३२ शेप्यानडे ३३ शेप्यायाम् ३४ यथा सूर्य इत्यन्वाह ३५ उत्तरया यांस्तान्पश्यति ३६ इन्द्रोतिभिरग्ने जातान्यो न स्तायद्दिप्सति यो नः शपादिति वैद्युद्धतीः ३७ सांतपना इत्यूर्ध्वशुषीः ३८ घ्रंसश्शृतं पुरोडाशं घ्रंसविलीनेन सर्वहुतम् ३९ उदस्य श्यावावितीषीकाञ्जिमणडूकं नीललोहिताभ्यां सूत्राभ्यां सकक्षं बद्ध्वोष्णोदके व्यादाय प्रत्याहुति मणडूकमपनुदत्यभिन्युब्जति ४० उपधा-वन्तमसदन्गाव इति काम्पीलं संनह्य क्षीरोत्सिक्ते पाययति लोहितानां चैक्क-शम् ४१ अशिशिषोः क्षीरौदनम् ४२ आमपात्रमभ्यवनेनेक्ति ४३ २ ४८

सपत्नहनमित्यृषभं संपातवन्तमतिसृजति १ आश्वत्थीरवपन्नाः २ स्वयमि-न्द्रस्यौज इति प्रक्षालयति ३ जिष्णवे योगायेत्यपो युनक्ति ४ वातस्य रंहितस्यामृतस्य योनिरिति प्रतिगृह्णाति ५ उत्तमाः प्रताप्याधराः प्रदायैन-सेनानधराचः पराचोऽवाचस्तपसस्तमुन्नयत देवाः पितृभिः संविदानः प्रजा-पतिः प्रथमो देवतानामित्यतिसृजति ६ इदमहं यो मा प्राच्या दिशोऽघायुरभिदासादपवादीदिषूगुहः तस्येमौ प्राणापानावपक्रामामि ब्रह्मणा ७ दक्षिणायाः प्रतीच्या उदीच्या ध्रुवाया व्यध्वाया ऊर्ध्वायाः ८ इदमहं

यो मा दिशामन्तर्देशेभ्य इत्यपक्रामामीति ९ एवमभिष्ट्वा १० नापोहन-
निवेष्टनानि सर्वाणि खलु शश्वद्भूतानि ११ ब्राह्मणाद्वज्रमुद्यच्छमानाच्छङ्कन्ते
मां हनिष्यसि मां हनिष्यसीति तेभ्योऽभयं वदेच्छमग्नये शं पृथिव्यै शम-
न्तरिक्षाय शं वायवे शं दिवे शं सूर्याय शं चन्द्राय शं नक्षत्रेभ्यः शं
गन्धर्वाप्सरोभ्यः शं सर्पेतरजनेभ्यः शिवं मह्यमिति १२ यो व आपोऽपां यं
वयमपामस्मै वज्रमित्यन्वृचमुदवज्रान् १३ विष्णोः क्रमोऽसीति विष्णु-
क्रमान् १४ ममाग्ने वर्च इति बृहस्पतिशिरसं पृषातकेनोपसिच्याभिम-
न्त्र्योपनिदधाति १५ प्रतिजानन्नानुव्याहरेत् १६ उत्तमेनोपद्रष्टारम् १७ उदेहि
वाजिन्नित्यर्धर्चेन नावं मज्जतीम् १८ समिद्धोऽग्निर्य इमे द्यावापृथिवी
अजैष्मेत्यधिपाशानादधाति १९ पदेपदे पाशान्वृश्चति २० अधिपाशान्बा-
धकाञ्छङ्कूंस्तान्संक्षुद्य संनह्य भ्राष्ट्रेऽभ्यस्यति २१ अशिशिषोः क्षीरौदनादीनि
त्रीणि २२ गर्तेध्मावन्तरेणावलेखनीं स्थाणौ निबध्य द्वादशरात्रं संपातान-
भ्यतिनिनयति २३ षष्ठचोदवज्रान्प्रहरति २४ सप्तम्याचामति २५ यश्च
गामित्यन्वाह २६ निर्दुर्मण्य इति संधाव्याभिमृशति २७ ३ ४९
इत्यथर्ववेदे कौशिकसूत्रे षष्ठोऽध्यायः समाप्तः

स्वस्तिदा ये ते पन्थान इत्यध्वानं दक्षिणेन प्रक्रामति १ व्युदस्यत्यसंख्याताः
शर्कराः २ तृणानि च्छित्वोपतिष्ठते ३ आरेऽमूः पारे पातं नो य एनं परिषीदन्ति
यदायुधं दण्डेन व्याख्यातम् ४ दिष्ट्या मुखं विमाय संविशति ५ त्रीणि
पदानि प्रमायोत्तिष्ठति ६ तिस्रो दिष्टीः ७ प्रेतं पादावित्यवशस्य ८ पाययति
९ उपस्थास्त इति त्रीण्योप्यातिक्रामति १० स्वस्ति मात्र इति निश्युपतिष्ठते
११ इन्द्रमहमिति पण्यं संपातवदुत्थापयति १२ निमृज्य दिग्युक्ताभ्यां दोषो
गाय पातं न इति पञ्चानडुह्यो यमो मृत्युर्विश्वजिच्छकधूमं भवाशर्वा-
वित्युपदधीत १३ उत्तमेन सारूपवत्सस्य रुद्राय त्रिर्जुहोति १४ उपोत्तमेन
सुहृदो ब्राह्मणस्य शकृत्पिण्डान्पर्वस्वाधाय शकधूमं किमद्याहरिति पृच्छति
१५ भद्रं सुमङ्गलमिति प्रतिपद्यते १६ युक्तयोर्मा नो देवा यस्ते सर्प इति
शयनशालोर्वराः परिलिखति १७ तृणानि युगतर्द्मना संपातवन्ति द्वारे प्रचृतति
१८ ऊबध्यं संभिनत्ति १९ निखनति २० आदधाति २१ अपामार्गप्रसूना-
न्कुद्रीचीशफान्पराचीनमूलान् २२ १ ५०

उदित इति खादिरं शङ्कुं संपातवन्तमुद्गृह्णन्निखनन्गा अनुव्रजति १ निनयनं समुह्य चारे सारूपवत्सस्येन्द्राय त्रिर्जुहोति २ दिश्यान्बलीन्हरति ३ प्रतिदिशमुपतिष्ठते ४ मध्ये पञ्चममनिर्दिष्टम् ५ शेषं निनयति ६ ब्रह्म जज्ञानं भवाशर्वावित्यासन्नमरण्ये पर्वतं यजते ७ अन्यस्मिन्भवशर्वपशुपत्युग्ररुद्रमहादेवेशानानां पृथगाहुतीः ८ गोष्ठे च द्वितीयमश्नाति ९ दर्भानाधाय धूपयति १० भूत्यै वः पुष्ट्यै व इति प्रथमजयोर्मिथुनयोर्मुखमनक्ति ११ तिस्रो नलदशाखा वत्सान्पाययति १२ शाखयोदकधारया गाः परिक्रामति १३ अश्मवर्म म इति षडश्मनः संपातवतः स्रक्तिषु पर्यधस्तान्निखनति १४ अलसालेत्यालभेषजम् १५ त्रीणि सिलाञ्जालाग्राण्युर्वरामध्ये निखनति १६ हतं तर्दमित्ययसा सीसं कर्षन्नुर्वरां परिक्रामति १७ अश्मनोऽवकिरति १८ तर्दमवशिरसं वदनात्केशेन समुह्योर्वरामध्ये निखनति १९ उक्तं चारे २० बलीन्हरत्याशाया आशापतयेऽश्विभ्यां क्षेत्रपतये २१ यदैतेभ्यः कुर्वीत वाग्यतस्तिष्ठेदास्तमयात् २२ २ ५१

ये पन्थान इति परीत्योपदधीत १ प्रयच्छति २ यस्यास्ते यत्ते देवी विषाणा पाशानित्युन्मोचनप्रतिरूपं संपातवन्तं करोति ३ वाचा बद्धाय भूमिपरिलेखम् ४ आयन इति शमनमन्तरा ह्रदं करोति ५ शाले च ६ अवकया शालां परितनोति ७ शप्यमानाय प्रयच्छति ८ निदग्धं प्रक्षालयति ९ महीमूष्विति तरणान्यालम्भयति १० दूरान्नावं संपातवतीं नौमणिं बध्नाति ११ प्रपथ इति नष्टैषिणां प्रक्षालिताभ्यक्तपाणिपादानां दक्षिणान्पाणीन्निमृज्योत्थापयति १२ एवं संपातवतः १३ निमृज्यैकविंशतिं शर्कराश्चतुष्पथेऽवक्षिप्यावकिरति १४ नमस्कृत्येति मन्त्रोक्तम् १५ अंहोलिङ्गानामापो भोजनहवींष्यभिमर्शनोपस्थानमादित्यस्य १६ स्वयं हविषां भोजनम् १७ विश्वे देवा इत्यायुष्याणि १८ स्थालीपाके घृतपिण्डान्प्रतिनीयाश्नाति १९ अस्मिन्वसु यदाबध्नन्नव प्राणानिति युग्मकृष्णलमादिष्टानां स्थालीपाक आधाय बध्नाति २० आशयति २१ ३ ५२

आयुर्दा इति गोदानं कारयिष्यन्सभारान्संभरति १ अमम्रिमोजोमानीं दूर्वामकर्णमश्ममण्डलमानडुहशकृत्पिण्डं षड्दर्भप्रान्तानि कंसमहते वसने शुद्धमाज्यं शान्ता ओषधीर्नवमुदकुम्भम् २ बाह्यतः शान्तवृक्षस्येध्मं प्राञ्च-

मुपसमाधाय ३ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य परिच-रणेनाज्यं परिचर्य ४ नित्यान्पुरस्ताद्धोमान्हुत्वाज्यभागौ च ५ पश्चादग्नेः प्राङ्मुख उपविश्यान्वारब्धाय शान्त्युदकं करोति ६ तत्रैतत्सूक्तमनुयोजयति ७ त्रिरेवाग्निं संप्रोक्षति त्रिः पर्युक्षति ८ त्रिः कारयमाणमाचामयति च संप्रोक्षति च ९ शकृत्पिण्डस्य स्थालरूपं कृत्वा सुहृदे ब्राह्मणाय प्रयच्छति १० तत्सुहृद्दक्षिणतोऽग्नेरुदङ्मुख आसीनो धारयति ११ अथास्मा अन्वारब्धाय करोति १२ आयुर्दा इत्यनेन सूक्तेनाज्यं जुह्वन्मूर्ध्नि संपातानानयति १३ दक्षिणे पाणावश्ममण्डल उदपात्र उत्तरसंपातान्स्थालरूप आनयति १४ अमम्रि-मोजोमानीं चोदपात्रेऽवधाय १५ स्थालरूपे दूर्वां शान्त्युदकमुष्णोदकं चैकधाभिसमासिच्य १६ आयमगन्सविता क्षुरेणेत्युदपात्रमनुमन्त्रयते १७ अदितिः श्मश्रित्युन्दति १८ यत्क्षुरेणेत्युदक्पत्त्रं क्षुरमद्भि श्चोत्य त्रिः प्रमार्ष्टि १९ येनावपदिति दक्षिणस्य केशपक्षस्य दर्भपिञ्जूल्या केशानभिनिधाय प्रछिद्य स्थालरूपे करोति २० एवमेव द्वितीयं करोति २१ एवं तृतीयम् २२ एवमेवोत्तरस्य केशपक्षस्य करोति २३ ४ ५३

अथ नापितं समादिशत्यक्षण्वन्वपकेशश्मश्रुरोम परिवप नखानि च कुर्विति १ पुनः प्राणः पुनर्मैत्विन्द्रियमिति त्रिर्निमृज्य २ त्वयि महिमानं सादया-मीत्यन्ततो योजयेत् ३ अथैनमुप्तकेशश्मश्रुं कृत्तनखमाप्लावयति ४ हिर-ण्यवर्णा इत्येतेन सूक्तेन गन्धप्रवादाभिरलंकृत्य ५ स्वक्तं म इत्यानक्ति ६ अथैनमहतेन वसनेन परिधापयति परि धत्तेति द्वाभ्याम् ७ एह्यश्मानमा तिष्ठेति दक्षिणेन पादेनाश्ममण्डलमास्थाप्य प्रदक्षिणमग्निमनुपरिणीय ८ अथास्य वासो निर्मुष्णाति यस्य ते वास इत्येतया ९ अथैनमपरेणाहतेन वसनेनाच्छादयत्ययं वस्ते गर्भं पृथिव्या इति पञ्चभिः १० यथा द्यौर्मनसे चेतसे धिय इति महाव्रीहीणां स्थालीपाकं श्रपयित्वा शान्त्युदकेनोपसिच्याभिमन्त्र्य प्राशयति ११ प्राणापानावोजोऽसीत्युपदधीत १२ तुभ्यमेव जरिमन्निति कुमारं मातापितरौ त्रिः संप्रयच्छेते १३ घृतपिण्डानाशयतः १४ चूडाकरणं च गोदानेन व्याख्यातम् १५ परिधापनाश्ममण्डलवर्जम् १६ शिवे ते स्तामिति परिदानान्तानि १७ पार्थिवस्य मा प्र गामेति चतस्रः सर्वा-ण्यपियन्ति १८ अमम्रिमोजोमानीं च दूर्वां च केशांश्च शकृत्पिण्डं चैक-धाभिसमाहृत्य १९ शान्तवृक्षस्योपर्यादधाति २० अधिकरणं ब्रह्मणः कंस-

वसनं गौर्दक्षिणा २१ ब्राह्मणान्भक्तेनोपेप्सन्ति २२ ५ ५४

उपनयनम् १ आयमगन्निति मन्त्रोक्तम् २ यत्क्षुरेणेत्युक्तम् ३ येनावपदि-ति सकृदपिञ्जूलि ४ लौकिकं च समानामा परिधानात् ५ उपेतपूर्वस्य नियतं सवान्दास्यतोऽग्नीनाधास्यमानः पर्यवेतव्रतदीक्षिष्यमाणानाम् ६ सोष्णोदकं शान्त्युदकं प्रदक्षिणमनुपरिणीय पुरस्तादग्नेः प्रत्यङ्मुखमवस्थाप्य ७ आह ब्रूहि ८ ब्रह्मचर्यमागमुप मा नयस्वेति ९ को नामासि किंगोत्र इत्य-स्त्रावितिति यथा नामगोत्रे भवतस्तथा प्रब्रूहि १० आर्षेयं मा कृत्वा बन्धुम-न्तमुपनय ११ आर्षेयं त्वा कृत्वा बन्धुमन्तमुपनयामीति १२ ओं भूर्भुवः स्वर्जनदोमित्यञ्जलावुदकमासिञ्चति १३ उत्तरोऽसानि ब्रह्मचारिभ्य इत्युत्तमं पाणिमन्वादधाति १४ एष म आदित्यपुत्रस्तन्मे गोपायस्वेत्यादित्येन समीक्षते १५ अपक्रामन्पौरुषेयाद्वृणान इत्येनं बाहुगृहीतं प्राञ्चमवस्थाप्य दक्षिणेन पाणिना नाभिदेशेऽभिसंस्तभ्य जपति १६ अस्मिन्वसु वसवो धारयन्तु विश्वे देवा वसव आ यातु मित्रोऽमुत्रभूयादन्तकाय मृत्यव आ रभस्व प्राणाय नमो विषासहिमित्यभिमन्त्रयते १७ अथापि परित्वरमाण आ यातु मित्र इत्यपि खल्वेतावतैवोपनीतो भवति १८ प्रच्छाद्य त्रीन्प्राणायामान्कृत्वावच्छाद्य वत्सतरीमुदपात्रे समवेक्षयेत् १९ समिन्द्र नः सं वर्चसेति द्वाभ्यामुत्सृजन्ति गाम् २० ६ ५५

श्रद्धाया दुहितेति द्वाभ्यां भाद्रमौञ्जीं मेखलां बध्नाति १ मित्रावरुणयोस्त्वा हस्ताभ्यां प्रसूतः प्रशिषा प्रयच्छामीति पालाशं दण्डं प्रयच्छति २ मित्रा-वरुणयोस्त्वा हस्ताभ्यां प्रसूतः प्रशिषा प्रतिगृह्णामि । सुश्रवः सुश्रवसं मा कुर्ववक्रोऽविथुरोऽहं भूयासमिति प्रतिगृह्णाति ३ श्येनोऽसीति च ४ अथैनं व्रतादानीयाः समिध आधापयति ५ अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तत्समापेयं तन्मे राध्यतां तन्मे समृध्यतां तन्मे मा व्यनशत्तेन राध्यासं तत्ते प्रब्रवीमि तदुपाकरोमि अग्नये व्रतपतये स्वाहा ६ वायो व्रतपते । सूर्य व्रतपते । चन्द्र व्रतपते । आपो व्रतपतयो । देवा व्रतपतयो । वेदा व्रतपतयो । व्रतानां व्रतपतयो व्रतमचारिषं तदशकं तत्समाप्तं तन्मे राद्धं तन्मे समृद्धं तन्मे मा व्यनशत्तेन राद्धोऽस्मि तद्वः प्रब्रवीमि तदुपाकरोमि व्रतेभ्यो व्रतपतिभ्यः स्वाहेति ७ अथैनं बद्धमेखलमाहितसमित्कं सावित्रीं वाचयति

८ पच्छः प्रथमम् ९ ततोऽर्धर्चशः १० ततः संहिताम् ११ अथैनं संशास्त्यग्नेश्चासि ब्रह्मचारिन्मम चापोऽशान कर्म कुरूर्ध्वस्तिष्ठन्मा दिवा स्वाप्सीः समिध आधेहि १२ अथैनं भूतेभ्यः परिददात्यग्नये त्वा परिददामि ब्रह्मणे त्वा परिददाम्युदङ्क्याय त्वा शूल्वाणाय परिददामि शत्रुंजयाय त्वा क्षात्राणाय परिददामि मार्त्युंजयाय त्वा मार्त्यवाय परिददाम्यघोराय त्वा परिददामि तक्षकाय त्वा वैशालेयाय परिददामि हाहाहूहूभ्यां त्वा गन्धर्वाभ्यां परिददामि योगक्षेमाभ्यां त्वा परिददामि भयाय च त्वाभयाय च परिददामि विश्वेभ्यस्त्वा देवेभ्यः परिददामि सर्वेभ्यस्त्वा देवेभ्यः परिददामि विश्वेभ्यस्त्वा भूतेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददामि सप्रजापतिकेभ्यः १३ स्वस्ति चरतादिहेति मयि रमन्तां ब्रह्मचारिण इत्यनुगृह्णीयात् १४ नानुप्रणुदेत् १५ प्रणीतीरभ्यावर्तस्वेत्यभ्यात्ममावर्तयति १६ यथापः प्रवता यन्ति यथा मासा अहर्जरम्

एवा मा ब्रह्मचारिणो धातरायन्तु सर्वदा
स्वाहेत्याचार्यः समिधमादधाति १७ ७ ५६

श्राद्धाया दुहितेति द्वाभ्यां भाद्रमौञ्जीं मेखलां ब्राह्मणाय बध्नाति १ मौर्वीं क्षत्रियाय धनुर्ज्यां वा २ क्षौमिकीं वैश्याय ३ मित्रावरुणयोस्त्वा हस्ताभ्यां प्रसूतः प्रशिषा प्रयच्छामीति पालाशं दण्डं ब्राह्मणाय प्रयच्छति ४ आश्वत्थं क्षत्रियाय ५ न्यग्रोधावरोहं वैश्याय ६ यद्यस्य दण्डो भज्येत य ऋते चिदभिश्रिष इत्येतयालभ्याभिमन्त्रयते ७ सर्वत्र शीर्णे भिन्ने नष्टेऽन्यं कृत्वा पुनर्मैत्विन्द्रियमित्यादधीत ८ अथ वासांसि ९ ऐणेयहारिणानि ब्राह्मणस्य १० रौरवपार्षतानि क्षत्रियस्य ११ आजाविकानि वैश्यस्य १२ सर्वेषां क्षौमशाणकम्बलवस्त्रम् १३ काषायाणि १४ वस्त्रं चाप्यकाषायम् १५ भवति भिक्षां देहीति ब्राह्मणश्चरेत् १६ भिक्षां भवती ददात्विति क्षत्रियः १७ देहि भिक्षां भवतीति वैश्यः १८ सप्त कुलानि ब्राह्मणश्चरेत्त्रीणि क्षत्रियो द्वे वैश्यः १९ सर्वं ग्रामं चरेद्भैक्षं स्तेनपतितवर्जम् २० मय्यग्र इति पञ्चप्रश्नेन जुहोति २१ सं मा सिञ्चन्त्विति त्रिः पर्युक्षति २२ यदग्ने तपसा तपोऽग्ने तपस्तप्यामह इति द्वाभ्यां परिसमूहयति २३ इदमापः प्रवहतेति पाणी प्रक्षालयते २४ सं मा सिञ्चन्त्विति त्रिः पर्युक्षति २५ अग्ने समिधमा-

हार्षमित्यादधाति चतस्त्रः २६ एधोऽसीत्यूष्मभक्तं भक्तयत्या निधनात् २७ त्वं नो मेध इत्युपतिष्ठते २८ यदन्नमिति तिसृभिर्भैक्तस्य जुहोति २९ अहरहः समिध आहृत्यैवं सायंप्रातरभ्यादध्यात् ३० मेधाजनन आयुष्यैर्जुहुयात् ३१ यथाकामं द्वादशरात्रमरसाशी भवति ३२ ८ ५७

भद्राय कर्णः क्रोशतु भद्रायाक्षि वि वेपताम्
परा दुःष्वप्न्यं सुव यद्भद्रं तन्न आ सुव

अक्षिवेपं दुःष्वप्न्यमार्तिं पुरुषरेषिणीम्
तदस्मदश्विना युवमप्रिये प्रति मुञ्चतम्

यत्पार्श्वादुरसो मे अङ्गादङ्गादववेपते
अश्विना पुष्करस्त्रजा तस्मान्नः पातमंहस

इति कर्णं क्रोशन्तमनुमन्त्रयते १ अक्षि वा स्फुरत् २ वि देवा जरसोत देवा आवतस्त उप प्रियमन्तकाय मृत्यव आ रभस्व प्राणाय नमो विषासहिमित्यभिमन्त्रयते ३ ब्राह्मणोक्तमृषिहस्तश्च ४ कर्मणे वां वेषाय वां सुकृताय वामिति पाणी प्रक्षाल्य ५ निर्दुरर्मण्य इति संधाव्य ६ शुद्धा न आप इति निष्ठीव्य जीवाभिराचम्य ७ एहि जीवमित्याञ्जनमणिं बध्नाति ८ वाताञ्जात इति कृशनम् ९ नव प्राणानिति मन्त्रोक्तम् १० घृतादुल्लुप्तमा त्वा चृतत्वृतुभिष्ट्वा मुञ्चामि त्वेति देवा आवतस्त उप प्रियमन्तकाय मृत्यव आ रभस्व प्राणाय नमो विषासहिमित्यभिमन्त्रयते ११ निर्दुरर्मण्य इति सर्वसुर-भिचूर्णैररण्येऽप्रतीहारं प्रलिम्पति १२ अथ नामकरणम् १३ आ रभस्वे-मामित्यविच्छिन्नामुदकधारामालम्भयति १४ पूतुदारुं बध्नाति १५ पाययति १६ यत्ते वास इत्यहतेनोत्तरसिचा प्रच्छादयति १७ शिवे ते स्तामिति कुमारं प्रथमं निर्णयति १८ शिवौ ते स्तामिति व्रीहियवौ प्राशयति १९ अह्ने च त्वेत्यहोरात्राभ्यां परिददाति २० शरदे त्वेत्यृतुभ्यः २१ उदस्य केतवो मूर्धाहं विषासहिमित्युद्यन्तमुपतिष्ठते २२ मध्यंदिनेऽस्तं यन्तं सकृत्पर्यायाभ्याम् २३ अंहोलिङ्गानामापो भोजनहवींष्युक्तानि २४ उत्तमासु यन्मातली रथक्रीतमिति सर्वासां द्वितीया २५ ९ ५८

विश्वे देवा इति विश्वानायुष्कामो यजते १ उपतिष्ठते २ इदं जनास इति द्यावापृथिव्यौ पुष्टिकामः ३ संपत्कामः ४ इन्द्र जुषस्वेतीन्द्रं बलकामः ५ इन्द्रमहमिति पण्यकामः ६ उदेनमुत्तरं नय योऽस्मानिन्द्रः सुत्रामेति ग्रामकामः ७ ग्रामसांपदानामप्ययः ८ यशसं मेन्द्र इति यशस्कामः ९ मह्यमाप इति व्यचस्कामः १० आगच्छत इति जायाकामः ११ वृषेन्द्रस्येति वृषकामः १२ आ त्वाहार्षं ध्रुवा द्यौरिति ध्रौव्यकामः १३ त्यमू षु त्रातारमा मन्द्रैरिति स्वस्त्ययनकामः १४ सामास्त्वाग्नेऽभ्यर्चतेत्यग्निं संपत्कामः १५ पृथिव्या-मिति मन्त्रोक्तम् १६ तदिदास धीती वेतीन्द्राग्नी १७ यस्येदमा रजोऽथ-र्वाणमदितिर्द्यौर्दितेः पुत्राणां बृहस्पते सवितरित्यभ्युदितं ब्रह्मचारिणं बोधयति १८ धाता दधातु प्रजापतिर्जनयत्यन्वद्य नो यन्न इन्द्रो ययोरोजसा विष्णोर्नु कमग्नाविष्णू सोमारुद्रा सिनीवालि बृहस्पतिर्नो यत्ते देवा अकृण्वन्पूर्णा पश्चात्प्रजापतेऽभ्यर्चत को अस्या न इति प्रजापतिम् १९ अग्न इन्द्रश्चेति मन्त्रोक्तान्सर्वकामः २० य ईशे ये भक्षयन्त इतीन्द्राग्नी लोककामः २१ अन्नं ददाति प्रथमम् २२ पशूपाकरणमुत्तमम् २३ सवपुरस्ताद्धोमा युज्यन्ते २४ दोषो गायेत्यथर्वाणं समावृत्याश्नाति २५ अभयं द्यावापृथिवी श्येनोऽसीति प्रतिदिशं सप्तर्षीनभयकामः २६ उत्तरेण दीक्षितस्य वा ब्रह्मचारिणो वा दण्डप्रदानम् २७ द्यौश्च म इति द्यावापृथिव्यौ विरिष्यति २८ यो अग्नाविति रुद्रान्स्वस्त्ययनकामः स्वस्त्ययनकामः २९ १० ५९

इत्यथर्ववेदे कौशिकसूत्रे सप्तमोऽध्यायः समाप्तः

अग्नीनाधास्यमानः सवान्वा दास्यन्संवत्सरं ब्रह्मौदनिकमग्निं दीपयति १ अहोरात्रौ वा २ याथाकामी वा ३ संवत्सरं तु प्रशस्तम् ४ सवाग्निसेनाग्नी तादर्थिकौ निर्मथ्यौ वा भवतः ५ औपासनौ चोभौ हि विज्ञायेते ६ तस्मिन्देवहेडनेनाज्यं जुहुयात् ७ समिधोऽभ्यादध्यात् ८ शकलान्वा ९ तस्मिन्यथाकामं सवान्ददात्येकं द्वौ सर्वान्वा १० अपि वैकैकमात्माशिषो दातारं वाचयति ११ पराशिषोऽनुमन्त्रणमनिर्दिष्टाशिषश्च १२ दातारौ कर्माणि कुरुतः १३ तौ यथालिङ्गमनुमन्त्रयते १४ उभयलिङ्गैरुभौ पुंलिङ्गैर्दातारं स्त्रीलिङ्गैः पत्नीम् १५ उदहृत्संप्रैषवर्जम् १६ अथ देवयजनम् १७ तद्यत्समं समूलमविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणमाकृतिलोष्टवल्मीकेनास्तीर्य दर्भैश्च लोमभिः पशूनाम् १८ अग्ने जायस्वेति मन्थन्तावनुमन्त्रयते १९ पत्नी मन्त्रं

संनमयति २० यजमानं च २१ कृणुत धूममिति धूमम् २२ अग्नेऽजनिष्ठा इति जातम् २३ समिद्धो अग्न इति समिध्यमानम् २४ परेहि नारीत्युदहृतं संप्रेष्यत्यनुगुप्तामलंकृताम् २५ एमा अगुरित्यायतीमनुमन्त्रयते २६ उत्तिष्ठ नारीति पत्नीं संप्रेष्यति २७ प्रति कुम्भं गृभायेति प्रतिगृह्णाति २८ ऊर्जो भाग इति निदधाति २९ इयं महीति चर्मास्तृणाति प्राग्ग्रीवमुत्तरलोम ३० पुमान्पुंस इति चर्मारोहयति ३१ पत्नी ह्वयमानम् ३२ तृतीयस्यामपत्यमन्वाह्वयति ३३ ऋषिप्रशिष्टेत्युदपात्रं चर्मणि निदधाति ३४ तदापस्पुत्रास इति सापत्या-वनुनिपद्येते ३५ १ ६०

प्राचींप्राचीमिति मन्त्रोक्तम् १ चतसृभिरुदपात्रमनुपरियन्ति २ प्रतिदिशं ध्रुवेयं विराडित्युपतिष्ठन्ते ३ पितेव पुत्रानित्यवरोह्य भूमिं तेनोदकार्थान्कुर्वन्ति ४ पवित्रैः संप्रोक्षन्ते ५ दर्भाग्राभ्यां चर्महविः संप्रोक्षति ६ आदिष्टानां सानजानत्यै प्रयच्छति ७ तांस्त्रेधा भाग इति व्रीहिराशिषु निदधाति ८ तेषां यः पितॄणां तं श्राद्धं करोति ९ यो मनुष्याणां तं ब्राह्मणान्भोजयति १० यो देवानां तमग्ने सहस्वानिति दक्षिणं जान्वाच्यापराजिताभिमुखः प्रह्वो वा मुष्टिप्रसृताञ्जलिभिः कुम्भ्यां निर्वपति ११ कुम्भ्या वा चतुः १२ तान्सप्त मेधानिति सापत्यावभिमृशतः १३ गृह्णामि हस्तमिति मन्त्रोक्तम् १४ त्रयो वरा इति त्रीन्वरान्वृणीष्वेति १५ अनेन कर्मणा ध्रुवानिति प्रथमं वृणीते १६ यावपरौ तावेव पत्नी १७ एतौ ग्रावाणावयं ग्रावेत्युलूखलमुसलं शूर्पं प्रक्षालितं चर्मण्याधाय १८ गृहाण ग्रावाणावित्युभयं गृह्णाति १९ साकं सजातैरिति व्रीहीनुलूखल आवपति २० वनस्पतिरिति मुसलमुच्छ्रयति २१ निर्भिन्ध्यंशून्पाहि पाप्मानमित्यवहन्ति २२ इयं ते धीतिर्वर्षवृद्धमिति शूर्पं गृह्णाति २३ ऊर्ध्वं प्रजां विश्वव्यचा इत्युदूहन्तीम् २४ परा पुनीहि तुषं पलावानिति निष्पुनतीम् २५ पृथग्रूपाणीत्यवक्षिणतीम् २६ त्रयो लोका इत्यवक्षीणानभिमृशतः २७ पुनरा यन्तु शूर्पमित्युद्वपति २८ उपश्वस इत्यपवेवेक्ति २९ पृथिवीं त्वा पृथिव्यामिति कुम्भीमालिम्पति ३० अग्ने चरुरित्यधिश्रयति ३१ अग्निः पचन्निति पर्यादधाति ३२ ऋषिप्रशिष्टे-त्युदकमपकर्षति ३३ शुद्धाः पूताः पूताः पवित्रैरिति पवित्रे अन्तर्धाय ३४ उदकमासिञ्चति ३५ ब्रह्मणा शुद्धाः संख्याता स्तोका इत्यापस्तासु निक्त्वा तण्डुलानावपति ३६ उरुः प्रथस्वोद्योधन्तीति श्रपयति ३७ प्र यच्छ पर्शुमिति

दर्भाहाराय दात्रं प्रयच्छति ३८ ओषधीर्दान्तु पर्वन्नित्युपरि पर्वणां लुनाति ३९ नवं बर्हिरिति बर्हि स्तृणाति ४० उदेहि वेदिं धर्ता ध्रियस्वेत्युद्वासयति ४१ अभ्यावर्तस्वेति कुम्भीं प्रदक्षिणमावर्तयति ४२ वनस्पते स्तीर्णमिति बर्हिषि पात्रीं निदधाति ४३ अंसध्रीमित्युपदधाति ४४ उप स्तृणीहीत्याज्येनो-पस्तृणाति ४५ उपास्तरीरित्युपस्तीर्णामनुमन्त्रयते ४६ २ ६१

अदितेर्हस्तां सर्वान्समागा इति मन्त्रोक्तम् १ तत उदकमादाय पात्र्यामानयति २ दर्व्या कुम्भ्यां ३ दर्विकृते तत्रैव प्रत्यानयति ४ दर्व्योत्तममपादाय तत्सुहृद्दक्षिणतोऽग्नेरुदङ्मुख आसीनो धारयति ५ अथोद्धरति ६ उद्धृते यदपादाय धारयति तदुत्तरार्ध आदधाति ७ अनुत्तराधरताया ओदनस्य यदुत्तरं तदुत्तरमोदन एवौदनः ८ षष्ट्यां शरत्स्विति पश्चादग्नेरुपसादयति ९ निधिं निधिपा इति त्रीणि काण्डानि करोति १० यद्यज्जायेति मन्त्रोक्तम् ११ सा पत्यावन्वारभते १२ अन्वारब्धेष्वत ऊर्ध्वं करोति १३ अग्नी रक्ष इति पर्यग्नि करोति १४ बभ्रेरध्वर्यो इदं प्रापमित्युपर्यापानं करोति १५ बभ्रेर्ब्रह्मन्निति ब्रूयादनध्वर्युम् १६ घृतेन गात्रा सिञ्च सर्पिरिति सर्पिषा विष्यन्दयति १७ वसोर्या धारा आदित्येभ्यो अङ्गिरीभ्य इति रसैरुपसिञ्चति १८ प्रियं प्रियाणामित्युत्तरतोऽग्नेर्धेन्वादीन्यनुमन्त्रयते १९ तामत्यासरत्प्रथमेति यथोक्तं दोहयित्वोपसिञ्चति २०

अत्यासरत्प्रथमा धोक्ष्यमाणा सर्वान्यज्ञान्बिभ्रती वैश्वदेवी
उप वत्सं सृजत वाश्यते गौर्व्यसृष्ट सुमना हिंकृणोति

बधान वत्समभि धेहि भुञ्जती निज्य गोधुगुप सीद दुग्धि
इरामस्मा ओदनं पिन्वमाना कीलालं घृतं मदमन्नभागम्

सा धावतु यमराज्ञः सवत्सा सुदुघां पथा प्रथमेह दत्ता
अतूर्णदत्ता प्रथमेदमागन्वत्सेन गां सं सृज विश्वरूपामिति २१

इदं मे ज्योतिः समग्नय इति हिरण्यमधिदधाति २२ एषा त्वचामित्यमोतं वासोऽग्रतः सहिरण्यं निदधाति २३ ३ ६२

यदक्षेष्विति समानवसनौ भवतः १ द्वितीयं तत्पापचैलं भवति तन्मनुष्या-धमाय दद्यादित्येके २ शृतं त्वा हव्यमिति चतुर आर्षेयान्भृग्वङ्गिरोविद उपसादयति ३ शुद्धाः पूता इति मन्त्रोक्तम् ४ पक्वं क्षेत्राद्वर्षं वनुष्वेत्यपकर्षति ५ अग्नौ तुषानिति तुषानावपति ६ परः कम्बूकानिति सव्येन पादेन फलीक-रणानपोहति ७ तन्वं स्वर्ग इत्यन्यानावपति ८ अग्ने प्रेहि समाचिनुष्वेत्याज्यं जुहुयात् ९ एष सवानां संस्कारः १० अर्थलुप्तानि निवर्तन्ते ११ यथासवं मन्त्रं संनमयति १२ लिङ्गं परिहितस्य लिङ्गस्यानन्तरं कर्मकर्मानुपूर्वेण लिङ्गं परीक्षेत १३ लिङ्गेन वा १४ कर्मोत्पत्त्यानुपूर्वं प्रशस्तम् १५ अतथोत्प-त्तेर्यथालिङ्गम् १६ समुच्चयस्तुल्यार्थानां विकल्पो वा १७ अथैतयोर्विभागः १८ सूक्तेन पूर्वं संपातवन्तं करोति १९ श्राम्यत इति प्रभृतिभिर्वा सूक्तेना-भिमन्त्रयाभिनिगद्य दद्याद्दाता वाच्यमानः २० अनुवाकेनोत्तरं संपातवन्तं करोति २१ प्राच्यै त्वा दिश इतिप्रभृतिभिर्वानुवाकेनाभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः २२ यथासवमन्यान्पृथग्वेति प्रकृतिः २३ सर्वे यथो-त्पत्त्याचार्याणां पञ्चौदनवर्जम् २४ प्रयुक्तानां पुनरप्रयोगम् २५ एके सहिरण्यां धेनुं दक्षिणां २६ गोदक्षिणां वा कौरुपथिः २७ संपातवतोऽभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः २८ एतं भागमेतं सधस्था उलूखल इति संस्थितहोमाः २९ आवपते ३० अनुमन्त्रणं च ३१ ४ ६३

आशानामिति चतुःशरावम् १ यद्राजान इत्यवेक्षति २ पदस्नातस्य पृथक्पादेष्वपूपान्निदधाति ३ नाभ्यां पञ्चमम् ४ उन्नह्यन्वसनेन सहिरण्यं संपातवन्तम् ५ आ नयैतमित्यपराजितादजमानीयमानमनुमन्त्रयते ६ इन्द्राय भागमित्यग्निं परिणीयमानम् ७ ये नो द्विषन्तीति संज्ञप्यमानम् ८ प्र पद इति पदः प्रक्षालयन्तम् ९ अनु च्छ्य श्यामेनेति यथापरु विशसन्तम् १० ऋचा कुम्भीमित्यधिश्रयन्तम् ११ आ सिञ्चेत्यासिञ्चन्तम् १२ अव धेहीत्य-वदधतम् १३ पर्याधत्तेति पर्यादधतम् १४ शृतो गच्छत्वित्युद्वासयन्तम् १५ उत्क्रामात इति पश्चादग्नेर्दर्भेषूद्धरन्तम् १६ उद्धृतमजमनज्मीत्याज्येनानक्ति १७ पञ्चौदनमिति पन्त्रोक्तम् १८ ओदनान्पृथक्पादेषु निदधाति १९ मध्ये पञ्चमम् २० दक्षिणं पश्चार्धं यूपेनोपसिच्य २१ शृतमजमित्यनुबद्धशिरःपादं त्वेतस्य चर्म २२ अजो हीति सूक्तेन संपातवन्तं यथोक्तम् २३ उत्तरोऽमोतं तस्याग्रतः सहिरण्यं निदधाति २४ पञ्च रुक्मेति मन्त्रोक्तम् २५ धेन्वादी-

न्युत्तरतः सोपधानमास्तरणं वासो हिरण्यं च २६ आ नयैतमिति सूक्तेन संपातवन्तम् २७ आञ्जनान्तं शतौदनायाः पञ्चौदनेन व्याख्यातम् २८ ५ ६४

अघायतामित्यत्र मुखमपिनह्यमानमनुमन्त्रयते १ सपत्नेषु वज्रं ग्रावा त्वैष इति निपतन्तम् २ वेदिष्ट इति मन्त्रोक्तमास्तृणाति ३ विंशत्योदनासु श्रयणीषु शतमवदानानि वध्रीसंनद्धानि पृथगोदनेषूपर्यादधति ४ मध्यमायाः प्रथमे रन्ध्रिण्यामिक्षां दशमेऽभितः सप्तसप्तापूपान्परिश्रयति ५ पञ्चदशे पुरोडाशौ ६ अग्रे हिरण्यम् ७ अपो देवीरित्यग्रत उदकुम्भान् ८ बालास्त इति सूक्तेन संपातवतीम् ९ प्रदक्षिणमग्निमनुपरिणीयोपवेशनप्रक्षालनाचमनमुक्तम् १० पाणावुदकमानीय ११ अथामुष्यौदनस्यावदानानां च मध्यात्पूर्वार्धाच्च द्विरवदायोपरिष्टादुदकेनाभिघार्य जुहोति सोमेन पूतो जठरे सीद ब्रह्मणामार्षेयेषु नि दध ओदन त्वेति १२ अथ प्राश्नाति १३

अग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन
इन्द्रस्य त्वा जठरे सादयामि वरुणस्योदरे

तद्यथा हुतमिष्टं प्राश्नीयाद्देवात्मा त्वा प्राश्नाम्यात्मास्यात्मन्नात्मानं मे मा हिंसीरिति प्राशितमनुमन्त्रयते १४

योऽग्निर्नृमणा नाम ब्राह्मणेषु प्रविष्टः
तस्मिन्म एष सुहुतोऽस्त्वोदनः स मा मा हिंसीत्परमे व्योमन्

सो अस्मभ्यमस्तु परमे व्योमन्निति दातारं वाचयति १५ वीक्षणान्तं शतौदनायाः प्रातर्जपेन व्याख्यातम् १६ ६ ६५

वाङ्म आसन्निति मन्त्रोक्तान्यभिमन्त्रयते १ बृहता मनो द्यौश्च मे पुनर्मैत्विन्द्रियमिति प्रतिमन्त्रयते २ प्रतिमन्त्रिते व्यवदायाश्नन्ति ३ शतौदनायां द्वादशं शतं दक्षिणाः ४ अधिकं ददतः कामप्रं संपद्यते ५ ब्रह्मास्येत्योदने ह्रदान्प्रतिदिशं करोति ६ उपर्यापानम् ७ तदभितश्चतस्रो दिश्याः कुल्याः ८ ता रसैः पूरयति ९ पृथिव्यां सुरयाद्भिराण्डीकादिवन्ति मन्त्रोक्तानि प्रति-

दिशं निधाय १० यमोदनमित्यतिमृत्युम् ११ अनड्वानित्यनड्वाहम् १२ सूर्यस्य रश्मीनिति कर्कीं सानूबन्ध्यां ददाति १३ आयं गौः पृश्निरयं सहस्रमिति पृश्निं गाम् १४ देवा इमं मधुना संयुतं यवमिति पौनःशिलं मधुमन्थं सहिरण्यं संपातवन्तम् १५ पुनन्तु मा देवजना इति पवित्रं कृशरम् १६ कः पृश्निमित्युर्वराम् १७ साहस्र इत्यृषभम् १८ प्रजापतिश्चेत्यनड्वाहम् १९ नमस्ते जायमानायै ददामीति वशामुदपात्रेण संपातवता संप्रोक्ष्या-भिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः २० भूमिष्ट्वेत्येनां प्रतिगृह्णाति २१ उपमितामिति यच्छालया सह दास्यन्भवति तदन्तर्भवत्यपिहितम् २२ मन्त्रोक्तं तु प्रशस्तम् २३ इटस्य ते वि चृतामीति द्वारमवसारयति २४ प्रतीचीं त्वा प्रतीचीन इत्युदपात्रमग्निमादाय प्रपद्यन्ते २५ तदन्तरेव सूक्तेन संपातवत्करोति २६ उदपात्रेण संपातवता शालां संप्रोक्ष्याभिमन्त्र्याभिनिगद्य दद्याद्दाता वाच्यमानः २७ अन्तरा द्यां च पृथिवीं चेत्येनां प्रतिगृह्णाति २८ उपमितामिति मन्त्रोक्तानि प्रचृतति २९ मा नः पाशमित्यभिमन्त्र्य धारयति ३० नास्या-स्थीनीति यथोक्तम् ३१ सर्वमेनं समादायेत्यद्भिः पूर्णे गर्ते प्रविध्य संवपति ३२ शतौदनां च ३३ ७ ६६

संभृतेषु साविकेषु संभारेषु ब्राह्मणमृत्विजं वृणीत १ ऋषिमार्षेयं सुधातुद-क्षिणमनैमित्तिकम् २ एष ह वा ऋषिरार्षेयः सुधातुदक्षिणो यस्य त्र्यवराध्र्याः पूर्वपुरुषा विद्याचरणवृत्तशीलसंपन्नाः ३ उदगयन इत्येके ४ अथात ओदनसवानामुपाचारकल्पं व्याख्यास्यामः ५ सवान्दत्त्वाग्नीनादधीत ६ सार्ववैदिक इत्येके ७ सर्वे वेदा द्विकल्पाः ८ मासपराध्र्या दीक्षा द्वादशरात्रो वा ९ त्रिरात्र इत्येके १० हविष्यभक्षा स्युर्ब्रह्मचारिणः ११ अधः शयीरन् १२ कर्तुदातारावा समापनात्कामं न भुञ्जीरन्संततश्चेत्स्युः १३ अहनि समाप्तमित्येके १४ यात्रार्थं दातारौ वा दाता केशश्मश्रुरोमनखानि वापयीत १५ केशवर्जं पत्नी १६ स्नातावहतवसनौ सुरभिणौ व्रतवन्तौ कर्मण्या-वुपवसतः १७ श्वो भूते यज्ञोपवीती शान्त्युदकं कृत्वा यज्ञवास्तु च संप्रोक्ष्य ब्रह्मौदनिकमग्निं मथित्वा १८ यद्देवा देवहेडनं यद्विद्वांसो यदविद्वांसोऽप-मित्यमप्रतीत्तमित्येतैस्त्रिभिः सूक्तैरन्वारब्धे दातरि पूर्णहोमं जुहुयात् १९ पूर्वाह्णे बाह्यतः शान्तवृक्षस्येध्मं प्राञ्चमुपसमाधाय २० परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य परिचरणेनाज्यं परिचर्य २१ नित्यान्पुरस्ताद्धोमा-

न्हुत्वाज्यभागौ च २२ पश्चादग्नेः पल्पूलितविहितमौक्षं वानडुहं वा रोहितं चर्म प्राग्ग्रीवमुत्तरलोम परिस्तीर्य २३ पवित्रे कुरुते २४ दर्भाविप्रच्छिन्नप्रान्तौ प्रक्षाल्यानुलोममनुमार्ष्टि २५ दक्षिणं जान्वाच्यापराजिताभिमुखः प्रह्वो वा मुष्टिना प्रसृतिनाञ्जलिना यस्यां श्रपयिष्यन्स्यात्तया चतुर्थम् २६ शरावेण चतुःशरावं देवस्य त्वा सवितुः प्रसव ऋषिभ्यस्त्वार्षेयेभ्यस्त्वैकर्षये त्वा जुष्टं निर्वपामि २७ ८ ६७

वसवस्त्वा गायत्रेण छन्दसा निर्वपन्तु । ऊर्जमक्षितमक्षीयमाणमुपजीव्या- समिति दातारं वाचयति १ रुद्रास्त्वा त्रैष्टुभेन च्छन्दसा । आदित्यास्त्वा जागतेन च्छन्दसा । विश्वे त्वा देवा आनुष्टुभेन च्छन्दसा निर्वपन्तु । ऊर्जमक्षितमक्षीयमाणमुपजीव्यासमिति दातारं वाचयति २ निरुप्तं सूक्तेना- भिमृशति ३ स्वर्गब्रह्मौदनौ तन्त्रम् ४ संनिपाते ब्रह्मौदनमितमुदकमासे- चयेद्विभागम् ५ यावन्तस्तण्डुलाः स्युर्नाविसिञ्चेन्न प्रतिषिञ्चेत् ६ यद्यवसिञ्चे- न्मयि वर्चो अथो यश इति ब्रह्मा यजमानं वाचयति ७ अथ प्रतिषिञ्चेत् ८ आ प्यायस्व सं ते पयांसीति द्वाभ्यां प्रतिषिञ्चेत् ९

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्
भवा वाजस्य संगथे

सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्वेति १०

तत्र चेदुपाधिमात्रायां नखेन न लवणस्य कुर्यात्तेनैवास्य तद्व्रथान्नं संपद्यते ११ अहतं वासो दक्षिणत उपशेते १२ तत्सहिरण्यम् १३ तत्र द्वे उदपात्रे निहिते भवतः १४ दक्षिणमन्यदन्तरमन्यत् १५ अन्तरं यतोऽधिचरिष्यन्भवति १६ बाह्यं जाङ्गायनम् १७ तत उदकमादाय पात्र्यामानयति १८ दर्व्या कुम्भ्याम् १९ दर्विकृते तत्रैव प्रत्यानयति २० दर्व्योत्तममपादाय तत्सुहृद्दक्षि- णतोऽग्नेरुदङ्मुख आसीनो धारयति २१ अथोद्धरति २२ उद्धृते यदपादाय धारयति तदुत्तरार्ध आधाय रसैरुपसिच्य प्रतिग्रहीत्रे दातोपवहति २३ तस्मिन्नन्वारब्धं दातारं वाचयति २४ तन्त्रं सूक्तं पच्छः स्नानेन यौ ते पक्षौ

यदतिष्ठः २५

यौ ते पक्षावजरौ पतत्रिणौ याभ्यां रक्षांस्यपहंस्योदन
ताभ्यां पथ्यास्म सुकृतस्य लोकं यत्र ऋषयः प्रथमजाः पुराणाः

यदतिष्ठो दिवस्पृष्ठे व्योमन्नध्योदन
अन्वायन्सत्यधर्माणो ब्राह्मणा राधसा सह २६

क्रमध्वमग्निना नाकं पृष्ठात्पृथिव्या अहमन्तरिक्षमारुहं स्वर्यन्तो नापेक्षन्त उरुः प्रथस्व महता महिम्नेदं मे ज्योतिः सत्याय चेति तिस्रः समग्नय इति सार्धमेतया २७ अत ऊर्ध्वं वाचिते हुते संस्थितेऽमूं ते ददामीति नामग्राहमुपस्पृशेत् २८ सदक्षिणं कामस्तदित्युक्तम् २९ ये भक्षयन्त इति पुरस्ताद्धोमाः ३०

अग्ने त्वं नो अन्तम उत त्राता शिवो भवा वरूथ्यः
तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः

गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः सुमित्रः सुमनो भवेत्याज्यभागौ ३१ पाणावुदकमानीयेत्युक्तम् ३२ प्रतिमन्त्रणान्तम् ३३ प्रतिमन्त्रिते व्यवदायाश्नन्ति ३४ इदावत्सरायेति व्रतविसर्जनमाज्यं जुहुयात् ३५

समिधोऽभ्यादध्यात् ३६ तत्र श्लोकौ
यजुषा मथिते अग्नौ यजुषोपसमाहिते
सवान्दत्त्वा सवाग्नेस्तु कथमुत्सर्जनं भवेत्

वाचयित्वा सवान्सर्वान्प्रतिगृह्य यथाविधि
हुत्वा संनतिभिस्तत्रोत्सर्गं कौशिकोऽब्रवीत् ३७

प्राञ्चोऽपराजितां वा दिशमवभृथाय व्रजन्ति ३८ अपां सूक्तैराप्लुत्य प्रदक्षिणमावृत्याप उपस्पृश्यानवेक्षमाणाः प्रत्युदाव्रजन्ति ३९ ब्राह्मणान्भक्तेनोपेप्सन्ति ४० यथोक्ता दक्षिणा यथोक्ता दक्षिणा ४१ ९ ६८

इत्यथर्ववेदे कौशिकसूत्रेऽष्टमोऽध्यायः समाप्तः

पित्र्यमग्निं शमयिष्यञ्ज्येष्ठस्य चाविभक्तिन एकाग्निमाधास्यन् १ अमावास्यायां पूर्वस्मिन्नुपशाले गां द्विहायनीं रोहिणीमेकरूपां बन्धयति २ निशि शामूलपरिहितो ज्येष्ठोऽन्वालभते ३ पत्न्यहतवसना ज्येष्ठम् ४ पत्नीमन्वञ्च इतरे ५ अथैनानभिव्याहारयत्यध्रिगो शमीध्वम् । सुशमि शमीध्वम् । शमीध्वमध्रिगा३उ इति त्रिः ६ अयमग्निः सत्पतिर्नडमा रोहेत्यनुवाकं महाशान्तिं च शान्त्युदक आवपते ७ अग्ने अक्रव्यादिति भ्राष्ट्राद्दीपं धारयति ८ भूमेश्चोपदग्धं समुत्खाय ९ आकृतिलोष्टवल्मीकेनास्तीर्य १० शकृत्पिण्डेनाभिलिप्य ११ सिकताभिः प्रकीर्याभ्युक्ष्य १२ लक्षणं कृत्वा १३ पुनरभ्युक्ष्य १४ पश्चाल्लक्षणस्याभिमन्थनं निधाय १५ गोऽश्वाजावीनां पुंसां लोमभिरास्तीर्य व्रीहियवैश्च शकृत्पिण्डमभिविमृज्य प्राञ्चौ दर्भौ निदधाति १६ वृषणौ स्थ इत्यभिप्राण्यारण्यौ १७ तयोरुपर्यधरारणिम् १८ दक्षिणतो मूलान् १९ पश्चात्प्रजननामुर्वश्यसीत्यायुरसीति २० मूलत उत्तरारणिमुपसंधाय २१ पृतनाजितमित्याहूय २२ अभिदक्षिणं ज्येष्ठस्त्रिरभिमन्थत्यों भूगायत्रं छन्दोऽनुप्रजायस्व त्रैष्टुभं जागतमानुष्टुभमों भूर्भुवः स्वर्जनदोमिति २३ अत ऊर्ध्वं यथाकामम् २४ १ ६९

मन्थामि त्वा जातवेदः सुजातं जातवेदसम्
स नो जीवेष्वा भज दीर्घमायुश्च धेहि नः

जातोऽजनिष्ठा यशसा सहाग्ने प्रजां पशूंस्तेजो रयिमस्मासु धेहि
आनन्दिनो मोदमानाः सुवीरा अनामयाः सर्वमायुर्गमेम

उद्दीप्यस्व जातवेदोऽव सेदिं तृष्णां क्षुधं जहि
अपास्मत्तम उच्छत्वप ह्नीतमुखो जह्यप दुर्हार्द्दिशो जहि

इहैवैधि धनसनिरिह त्वा समिधीमहि
इहैधि पुष्टिवर्धन इह त्वा समिधीमहीति १

प्रथमया मन्थति २ द्वितीयया जातमनुमन्त्रयते ३ तृतीययोद्दीपयति ४ चतुर्थ्योपसमादधाति ५ यत्त्वा क्रुद्धा इति चों भूर्भुवः स्वर्जनदोमित्यङ्गिरसां त्वा देवानामादित्यानां व्रतेना दधे । द्यौर्मह्नासि भूमिर्भूम्ना तस्यास्ते देव्यदितिरुपस्थेऽन्नादायान्नपत्याया दधदिति ६ लक्षणे प्रतिष्ठाप्योपोत्थाय ७ अथोपतिष्ठते ८

अग्ने गृहपते सुगृहपतिरहं त्वयाग्ने गृहपतिना भूयसम्
सु गृहपतिस्त्वं मयाग्ने गृहपतिना भूयाः
अस्थूरि णौ गार्हपत्यानि दीदिहि शतं समा इति ९

व्याकरोमीति गार्हपत्यक्रव्यादौ समीक्षते १० शान्तमाज्यं गार्हपत्यायोपनिदधाति ११ माषमन्थं क्रव्यादम् १२ उप त्वा नमसेति पुरोऽनुवाक्या १३ विश्वाहा त इति पूर्णाहुतिं जुहोति १४ यो नो अग्निरिति सह कर्त्रा हृदयान्यभिमृशन्ते १५ २ ७०

अंशो राजा विभजतीमागग्नी विधारयन्
क्रव्यादं निर्णुदामसि हव्यवाडिह तिष्ठत्विति विभागं जपति १

सुगार्हपत्य इति दक्षिणेन गार्हपत्ये समिधमादधाति २ यः क्रव्यात्तमशीशममिति सव्येन नडमयीं क्रव्यादि ३ अपावृत्येति मन्त्रोक्तं बाह्यतो निधाय ४ नडमा रोह समिन्धत इषीकां जरतीं प्रत्यञ्चमर्कमित्युपसमादधाति ५ यद्व्यग्निर्यो अग्निरविः कृष्णा मा नो रुरोः शुचद्विदः शिवो नो अस्तु भरतो रराणः । अतिव्याधी व्याधो अग्रभीष्ट कव्यादो अग्नीञ्छमयामि सर्वानिति शुक्त्या माषपिष्टानि जुहोति ६ सीसं दर्व्यामवधायोद्ग्रथ्य मन्थं जुह्वञ्छमयेत् ७ नडमा रोहेति चतस्रोऽग्ने अक्रव्यादिमं क्रव्याद्यो नो अश्वेष्वन्येभ्यस्त्वा हिरण्यपाणिमिति शमयति ८ दक्षिणतो जरत्कोष्ठे शीतं भस्माभिविहरति ९ शान्त्युदकेन सुशान्तंकृत्वावदग्धं समुत्खाय १० परं मृत्यो इत्युत्थापयति ११ क्रव्यादमिति तिसृभिर्ह्रीयमाणमनुमन्त्रयते १२ दीपाद्याभिनिगदनात्प्रतिहरणेन व्याख्यातम् १३ अविः कृष्णेति निदधाति १४ उत्तमवर्जं ज्येष्ठस्याञ्जलौ सीसानि १५ अस्मिन्वयं सद्रिप्रं सीसे मृड्ढ्वमित्यभ्यवनेजयति १६

कृष्णोर्णया पाणिपादान्निमृज्य १७ इमा जीवा उदीचीनैरिति मन्त्रोक्तम् १८ त्रिः सप्तेति कूद्या पदानि योपयित्वा नदीभ्यः १९ मृत्योः पदमिति द्वितीयया नावः २० परं मृत्यो इति प्राग्दक्षिणं कूदीं प्रविध्य २१ सप्त नदीरूपाणि कारयित्वोदकेन पूरयित्वा २२ आ रोहत सवितुर्नावमेतां सुत्रामाणं महीमू ष्विति सहिरण्यां सयवां नावमारोहयति २३ अश्मन्वती रीयत उत्तिष्ठता प्र तरता सखाय इत्युदीचस्तारयति २४ ३ ७१

उत्तरतो गर्त उदक्प्रस्रवणेऽश्मान निदधात्यन्तश्छिन्नम् १ तिरो मृत्युमित्यश्मा- नमतिक्रामति २ ता अधरादुदीचीरित्यनुमन्त्रयते ३ निस्सालामिति शाला- निवेशनं संप्रोक्ष्य ४ ऊर्जं बिभ्रदिति प्रपादयति ५ वैश्वदेवीमिति वत्स- तरीमालम्भयति ६ इममिन्द्रमिति वृषम् ७ अनड्वाहमहोरात्रे इति तल्यमालम्भयति ८ आ रोहतायुरित्यारोहति ९ आसीना इत्यासीना- मनुमन्त्रयते १० पिञ्जूलीराञ्जनं सर्पिषि पर्यस्येमा नारीरिति स्त्रीभ्यः प्रयच्छति ११ इमे जीवा अविधवाः सुजामय इति पुंभ्य एकैकस्मै तिस्रस्तिस्रस्ता अध्यध्युदधानं परिचृत्य प्रयच्छति १२ परं मृत्यो व्याकरोम्या रोहतान्तर्धिः प्रत्यञ्चमर्कं ये अग्नयो नमो देववधेभ्योऽग्नेऽभ्यावर्तिन्नग्ने जातवेदः सह रय्या पुनरूर्जेति १३

अग्नेऽभ्यावर्तिन्नभि न आ ववृत्स्व
आयुषा वर्चसा सन्या मेधया प्रजया धनेन

अग्ने जातवेदः शतं ते सहस्रं त उपावृतः
अधा पुष्टस्येशानः पुनर्नो रयिमा कृधि

सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया
विश्वप्स्न्या विश्वतस्परि

पुनरूर्जा ववृत्स्व पुनरग्न इषायुषा
पुनर्नः पाह्यंहसः १४

शर्करान्स्वयमातृणाञ्छणरज्जुभ्यां विबध्य धारयति १५ समया खेन जुहोति १६ इमं जीवेभ्य इति द्वारे निदधाति १७ जुहोत्येतयर्चा । आयुर्दावा धनदावा बलदावा पशुदावा पुष्टिदावा प्रजापतये स्वाहेति १८ षट्संपातं माता पुत्रानाशयते १९ उच्छिष्टं जायाम् २० संवत्सरमग्निं नोद्वायान्न हरेन्नाहरेयुः २१ द्वादशरात्र इत्येके २२ दश दक्षिणा २३ पश्चादग्नेर्वाग्यतः संविशति २४ अपरेद्युरग्निं चेन्द्राग्नी च यजेत २५ स्थालीपाकाभ्यामग्निं चाग्नीषोमौ च पौर्णमास्याम् २६ सायंप्रातर्व्रीहीनावपेद्यवान्वाग्नये स्वाहा प्रजापतये स्वाहेति २७ सायं सूर्याय स्वाहा प्रजापतये स्वाहेति २८ प्रातर्द्वादशरात्रेऽग्निं पशुना यजेत २९ स्थालीपाकेन वोभयोर्विरिष्यति ३० संवत्सरतम्यां शान्त्युदकं कृत्वा ३१ घृताहुतिर्नो भवाग्ने अक्रव्याहुतिर्घृताहुतिं त्वा वयमक्रव्याहुतिमुपनिषदेम जातवेद इति चतुर उदपात्रे संपातानानीय ३२ तानुल्लप्य ३३ पुरस्तादग्नेः प्रत्यङासीनो जुहोति । हुते रमस्व हुतभाग एधि मृडास्मभ्यं मोत हिंसीः पशून्न इति ३४ यद्युद्वायाद्भस्मनारणिं संस्पृश्य तूष्णीं मथित्वोद्दीप्य ३५ पूर्णहोमं हुत्वा ३६ संनतिभिराज्यं जुहुयाद्व्या-हृतिभिर्वा ३७ संसृष्टे चैवं जुहुयात् ३८ अग्नावनुगते जायमाने ३९ आनडुहेन शकृत्पिण्डेनाग्न्यायतनानि परिलिप्य ४० होम्यमुपसाद्य ४१ प्राणापानाभ्यां स्वाहा समानव्यानाभ्यां स्वाहोदानरूपाभ्यां स्वाहेत्यात्मन्येव जुहुयात् ४२ अथ प्रातरुत्थायाग्निं निर्मथ्य यथास्थानं प्रणीय यथापुरमग्निहोत्रं जुहुयात् ४३ सायमाशप्रातराशौ यज्ञावृत्विजौ ४४ ४ ७२

पुरोदयादस्तमयाच्च पावकं प्रबोधयेद्गृहिणी शुद्धहस्ता
समतीते संधिवर्णेऽथ हावयेत्सुसमिद्धे पावक आहुतीषहिः १

अग्नये च प्रजापतये च रात्रावादित्यश्च दिवा प्रजापतिश्च
उदकं च समिधश्च होमेहोमे पुरो वरम् २

होम्यैः समिद्भिः पयसा स्थालीपाकेन सर्पिषा
सायंप्रातर्होम एतेषामेकेनापि सिध्यति ३

अभ्युद्धृतो हुतोऽग्निः प्रमादादुपशाम्यति

मथिते व्याहृतीर्जुहुयात्पूर्णहोमौ यथऋृत्विजौ ४

वनस्पतिभ्यो वानस्पत्येभ्य ओषधिभ्यो वीरुद्भ्यः सर्वेभ्यो देवेभ्यो देवजने-
भ्यः पुण्यजनेभ्य इति प्राचीनं तदुदकं निनीयते ५ स्वधा प्रपितामहेभ्यः
स्वधा पितामहेभ्यः स्वधा पितृभ्य इति दक्षिणतः ६ तार्क्ष्यायारिष्टनेमयेऽमृतं
मह्यमिति पश्चात् ७ सोमाय सप्तर्षिभ्य इत्युत्तरतः ८

परिमृष्टे परिलिप्ते च पर्वणि व्रातपतं हावयेदन्नमग्नौ
भूयो दत्त्वा स्वयमल्पं च मुक्त्वापराह्णे व्रतमुपैति याज्ञिकम् ९

अनशनं ब्रह्मचर्यं च भूमौ शुचिरग्निमुपशेते सुगन्धिः १०

अग्नीषोमाभ्यां दर्शन इन्द्राग्निभ्यामदर्शने
आग्नेयं तु पूर्वं नित्यमन्वाहार्यं प्रजापतेः ११

अर्धाहुतिस्तु सौविष्टकृती सर्वेषां हविषां स्मृता
आनुमती वा भवति स्थालीपाकेष्वथर्वणाम् १२

उभौ च संधिजौ यौ वैश्वदेवौ यथऋृत्विजौ
वर्जयित्वा सबर्हिषः साज्या यज्ञाः सदक्षिणाः १३

यथाशक्ति यथाबलं हुतादोऽन्ये अहुतादोऽन्ये
वैश्वदेवं हविरुभये संचरन्ति १४

ते सम्यञ्च इह मादयन्तामिषमूर्जं यजमाना यमिच्छत
विश्वे देवा इदं हविरादित्यासः सपर्यत
अस्मिन्यज्ञे मा व्यथिष्यमृताय हविष्कृतम् १५

वैश्वदेवस्य हविषः सायंप्रातर्जुहोति
सायमाशप्रातराशौ यज्ञावेतौ स्मृतावुभौ १६

अप्रतिभुक्तौ शुचिकार्यौ च नित्यं वैश्वदेवौ जानता यज्ञश्रेष्ठौ
नाश्रोत्रियो नानवनिक्तपाणिर्नामन्त्रविज्जुहुयान्नाविपश्चित् १७

बीभत्सवः शुचिकामा हि देवा नाश्रद्दधानस्य हविर्जुषन्ते
ब्राह्मणेन ब्रह्मविदा तु हावयेन्न स्त्रीहुतं शूद्रहुतं च देवगम् १८

यस्तु विद्याद्राज्यभागौ यज्ञान्मन्त्रपरिक्रमान्
देवताज्ञानमावृत आशिषश्च कर्म स्त्रिया अप्रतिषिद्धमाहुः १९ ५ ७३

तयोर्बलिहरणम् १ अग्नय इन्द्राग्निभ्यां वास्तोष्पतये प्रजापतयेऽनुमतय इति हुत्वा २ निष्क्रम्य बहिः प्रचीनं ब्रह्मणे वैश्रवणाय विश्वेभ्यो देवेभ्यः सर्वेभ्यो देवेभ्यो विश्वेभ्यो भूतेभ्यः सर्वेभ्यो भूतेभ्य इति बहुशो बलिं हरेत् ३ द्विः प्रोक्षन्प्रदक्षिणमावृत्यान्तरुपातीत्य द्वारे ४ द्वार्ययोर्मृत्यवे धर्माधर्माभ्याम् ५ उदधाने धन्वन्तरये समुद्रायौषधिवनस्पतिभ्यो द्यावापृथिवीभ्यामिति ६ स्थूणावंशयोर्दिग्भ्योऽन्तर्देशेभ्य इति ७ स्रक्तिषु वासुकये चित्रसेनाय चित्ररथाय तक्षोपतक्षाभ्यामिति ८ समन्तमग्नेराशायै श्रद्धायै मेधायै श्रियै ह्रियै विद्याया इति ९ प्राचीनमग्नेः गृह्याभ्यो देवजामिभ्य इति १० भूयोऽभ्युद्धृत्य ब्राह्मणान्भोजयेत् ११ तदपि श्लोको वदति

माब्राह्मणाग्रतः कृतमश्नीयाद्विषवदन्नमन्नकाम्या
देवानां देवो ब्राह्मणो भावो नामैष देवतेति १२

आग्रयणे शान्त्युदकं कृत्वा यथर्तु तण्डुलानुपसाद्य १३ अप्सु स्थालीपाकं श्रपयित्वा पयसि वा १४ सजूर्ऋतुभिः सजूर्विधाभिः सजूरग्नये स्वाहा । सजूरिन्द्राग्निभ्यां सजूर्द्यावापृथिवीभ्यां सजूर्विश्वेभ्यो देवेभ्यः सजूर्ऋतुभिः सजूर्विधाभिः सजूः सोमाय स्वाहेत्येकहविर्वा स्यान्नानाहवींषि वा १५ सौम्यं तन्वच्छ्यामाकं शरदि १६ अथ यजमानः प्राशित्रं गृह्णीते १७ प्रजापतेष्ट्वा ग्रहं गृह्णामि । मह्यं भूत्यै मह्यं पुष्ट्यै मह्यं श्रियै मह्यं ह्रियै मह्यं यशसे मह्यमायुषे मह्यमन्नाय मह्यमन्नाद्याय मह्यं सहस्रपोषाय मह्यमपरिमितपोषायेति १८ अथ प्राश्नाति

भद्रान्नः श्रेयः समनैष्टदेवास्त्वयावसेन समशीमहि त्वा
स नः पितो मधुमाँ आ विवेश शिवस्तोकाय तन्वो न एहीति १९

प्राशितमनुमन्त्रयते
अमोऽसि प्राण तदृतं ब्रवीम्यमासि सर्वाङसि प्रविष्टः
स मे जरां रोगमपनुद्य शरीरादनामयैधि मा रिषाम इन्दो इति २०

वत्सः प्रथमजो ग्रीष्मे वासः शरदि दक्षिणा २१ शक्त्या वा दक्षिणां द-
द्यात् २२ नातिशक्तिर्विधीयते नातिशक्तिर्विधीयत इति २३ ६ ७४
इत्यथर्ववेदे कौशिकसूत्रे नवमोऽध्यायः समाप्तः

अथ विवाहः १ ऊर्ध्वं कार्त्तिक्या आ वैशाख्याः २ याथाकामी वा ३ चित्रापक्षं तु वर्जयेत् ४ मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यत इति विज्ञायते मङ्गलं च ५ सत्येनोत्तभिता पूर्वापरमित्युपदधीत ६ पतिवेदनं च ७ युवं भगमिति संभलं सानुचरं प्रहिणोति ८ ब्रह्मणस्पत इति ब्रह्माणम् ९ तद्वि-वृहाच्छङ्कमानो निशि कुमारीकुलाद्वलीकान्यादीप्य १० देवा अग्र इति पञ्चभिः सकृत्पूल्यान्यावापयति ११ अनृक्षरा इति कुमारीपालं प्रहिणोति १२ उदा-हारस्य प्रतिहितेषुरग्रतो जघनतो ब्रह्मा १३ यो अनिध्म इत्यप्सु लोगं प्रविध्यति १४ इदमहमित्यपोह्य १५ यो भद्र इत्यन्वीपमुदच्य १६ आस्यै ब्राह्मणा इति प्रयच्छति १७ आव्रजतामग्रतो ब्रह्मा जघनतोऽधिज्यधन्वा १८ बाह्यतः प्लक्षोदुम्बरस्योत्तरतोऽग्नेः शाखायामासजति १९ तेनोदकार्थान्कुर्वन्ति २० ततश्चान्वासेचनमन्येन २१ अन्तरुपातीत्यार्यमणमिति जुहोति २२ प्र त्वा मुञ्चामीति वेष्टं विचृतति २३ उशतीरित्येतया त्रिराधापयति २४ सप्तभिरुष्णाः संपातवतीः करोति २५ यदासन्द्यामिति पूर्वयोरुत्तरस्यां स्रक्त्यां तिष्ठन्तीमा-प्लावयति २६ यच्च वर्चो यथा सिन्धुरित्युत्क्रान्तामन्येनावसिञ्चति २७ १ ७५

यद्दुष्कृतमिति वाससाङ्गानि प्रमृज्य कुमारीपालाय प्रयच्छति १ तुम्बरदण्डेन प्रतिपाद्य निर्व्रजेत् २ तद्वन आसजति ३ या अकृन्तंस्त्वष्टा वास इत्यह-तेनाच्छादयति ४ कृत्रिम इति शतदतैषीकेण कङ्कतेन सकृत्प्रलिख्य ५

कृतयाममित्यवसृजति ६ आशासाना सं त्वा नह्यामीत्युभयतः पाशेन योक्त्रेन संनह्यति ७ इयं वीरुदिति मदुघमणिं लाक्षारक्तेन सूत्रेण विग्रथ्यानामिकायां बध्नाति ८ अन्ततो ह मणिर्भवति बाह्यो ग्रन्थिः ९ भगस्त्वेत इति हस्तेगृह्य निर्णयति १० शाखायां युगमाधाय दक्षिणतोऽन्यो धारयति ११ दक्षिणस्यां युगधुर्युत्तरस्मिन्युगतर्द्मनि दर्भेण विग्रथ्य शं त इति ललाटे हिरण्यं संस्तभ्य जपति १२ तर्द्म समयावसिञ्चति १३ उपगृह्योत्तरतोऽग्नेरङ्गादङ्गादिति निनयति १४ स्योनमिति शकृत्पिण्डेऽश्मानं निदधाति १५ तमा तिष्ठेत्यास्थाप्य १६ इयं नारीति ध्रुवां तिष्ठन्तीं पूल्यान्यावापयति १७ त्रिरविच्छिन्दतीं चतुर्थी कामाय १८ येनाग्निरिति पाणिं ग्राहयति १९ अर्यम्ण इत्यग्निं त्रिः परिणयति २० सप्त मर्यादा इत्युत्तरतोऽग्नेः सप्त लेखा लिखति प्राच्यः २१ तासु पदान्युत्क्रामयति २२ इषे त्वा सुमङ्गलि प्रजावति सुसीम इति प्रथमम् २३ ऊर्जे त्वा रायस्पोषाय त्वा सौभाग्याय त्वा साम्राज्याय त्वा संपदे त्वा जीवातवे त्वा सुमङ्गलि प्रजावति सुसीम इति सप्तमं सखा सप्तपदी भवेति २४ आ रोह तल्पं भगस्ततक्षेति तल्प उपवेशयति २५ उपविष्टायाः सुहृत्पादौ प्रक्षालयति २६ प्रक्षाल्यमानावनुमन्त्रयते । इमौ पादौ सुभगौ सुशेवौ सौभाग्याय कृणुतां नो अघाय । प्रक्षाल्यमानौ मुभगौ सुपत्न्याः प्रजां पशून्दीर्घमायुश्च धत्तामिति २७ अहं वि ष्यामि प्र त्वा मुञ्चामीति योक्त्रं विचृतति २८ अपरस्मिन्भृत्याः संरभन्ते २९ ये जयन्ति ते बलीयांस एव मन्यन्ते ३० बृहस्पतिनेति सर्वसुरभिचूर्णान्यृचर्चा काम्पीलपलाशेन मूर्ध्न्यावपति ३१ उद्यच्छध्वं भगस्ततक्षाभ्रातृघ्नीमित्येकैकयोत्थापयति ३२ प्रति तिष्ठेति प्रतिष्ठापयति ३३ २ ७९

सुकिंशुकं रुक्मप्रस्तरणामिति यानमारोहयति १ एमं पन्थां ब्रह्मापरमित्यग्रतो ब्रह्मा प्रपद्यते २ मा विदन्ननृक्षरा अध्वानमित्युक्तम् ३ येदं पूर्वेति तेनान्यस्यामूढायां वाधूयस्य दशां चतुष्पथे दक्षिणैरभितिष्ठति ४ स चेदुभयोः शुभकामो भवति सूर्यायै देवेभ्य इत्येतामृचं जपति ५ समृच्छत स्वपथोऽनवयन्तः सुसीमकामावुभे विराजावुभे सुप्रजसावित्यतिक्रमयतोऽन्तरा ब्रह्माणम् ६ य ऋते चिदभिश्रिष इति यानं संप्रोक्ष्य विनिष्कारयति ७ सा मन्दसानेति तीर्थे लोगं प्रविध्यति ८ इदं सु म इति महावृक्षेषु जपति ९ सुमङ्गलीरिति वध्वीक्षीः प्रति जपति १० या ओषधय इति मन्त्रोक्तेषु ११ ये

पितर इति श्मशानेषु १२ प्र बुध्यस्वेति सुप्तां प्रबोधयेत् १३ सं काशयामीति गृहसंकाशे जपति १४ उद्व ऊर्मिरिति यानं संप्रोद्य विमोचयति १५ उत्तिष्ठेत इति पत्नी शालां संप्रोक्षति १६ स्योनमिति दक्षिणतो वलीकानां शकृत्पिण्डेऽश्मानं निदधाति १७ तस्योपरि मध्यमपलाशे सर्पिषि चत्वारि दूर्वाग्राणि १८ तमा तिष्ठेत्यास्थाप्य १९ सुमङ्गली प्रतरणीह प्रियं मा हिंसिष्टं ब्रह्मापरमिति प्रत्यृचं प्रपादयति २० सुहृत्पूर्णकंसेन प्रतिपादयति २१ अघोरचक्षुरित्यग्निं त्रिः परिणयति २२ यदा गार्हपत्यं सूर्यायै देवेभ्य इति मन्त्रोक्तेभ्यो नमस्कुर्वतीमनुमन्त्रयते २३ ३ ७७

शर्म वर्मेति रोहितचर्माहरन्तम् १ चर्म चोपस्तृणीथनेत्युपस्तृणन्तम् २ यं बल्बजमिति बल्बजं न्यस्यन्तम् ३ उप स्तृणीहीत्युपस्तृणन्तम् ४ तदा रोहत्वित्यारोहयति ५ तत्रोपविश्येत्युपवेशयति ६ दक्षिणोत्तरमुपस्थं कुरुते ७ सुज्यैष्ठ्य इति कल्याणनामानं ब्राह्मणायनमुपस्थ उपवेशयति ८ वि तिष्ठन्तामिति प्रमदनं प्रमायोत्थापयति ९ तेन भूतेन तुभ्यमग्रे शुम्भनी अग्निर्जनविन्मह्यं जायामिमामदात्सोमो वसुविन्मह्यं जायामिमामदात्पूषा जातिविन्मह्यं जायामिमामदादिन्द्रः सहीयान्मह्यं जायामिमामदादग्नये जनविदे स्वाहा सोमाय वसुविदे स्वाहा पूष्णे जातिविदे स्वाहेन्द्राय सहीयसे स्वाहेत्यागच्छतः १० सविता प्रसवानामिति मूर्ध्नोः संपातानानयति ११ उदपात्र उत्तरान् १२ शुम्भन्याञ्जल्योर्निनयति १३ तेन भूतेनेति समशनम् १४ रसानाशयति स्थालीपाकं च १५ यवानामाज्यमिश्राणां पूर्णाञ्जलिं जुहोति १६ ४ ७८

सप्त मर्यादा इति तिमृणां प्रातरावपते १ अक्ष्यौ नाविति समाञ्जाते २ महीमू ष्विति तल्पमालम्भयति ३ आ रोह तल्पमित्यारोहयति ४ तत्रोपविश्येत्युपवेशयति ५ देवा अग्र इति संवेशयति ६ अभि त्वेत्यभिच्छादयति ७ सं पितराविति समावेशयति ८ इहेमाविति त्रिः संनुदति ९ मदुघमणिमौक्षेऽपनीयेयं वीरुदमोऽहमिति संस्पृशतः १० ब्रह्म जज्ञानमित्यङ्गुष्ठेन व्यचस्करोति ११ स्योनाद्योनेरित्युत्थापयति १२ परिधापनीयाभ्यामहतेनाच्छादयति १३ बृहस्पतिरिति शष्पेणाभिघार्य व्रीहियवाभ्यामभिनिधाय दर्भपिञ्जूल्या सीमन्तं विचृतति १४ शणशकलेन परिवेष्ट्य तिस्रो रात्रीः प्रति

सुप्तास्ते १५ अनुवाकाभ्यामन्वारब्धाभ्यामुपदधीत १६ इहेदसाथेत्येतया शुल्कमपाकृत्य १७ द्वाभ्यां निवर्तयतीह मम राध्यतामत्र तवेति १८ यथा वा मन्यन्ते १९ परा देहीति वाधूयं ददतमनुमन्त्रयते २० देवैर्दत्तमिति प्रतिगृह्णाति २१ अपास्मत्तम इति स्थाणावासजति २२ यावतीः कृत्या इति व्रजेत् २३ या मे प्रियतमेति वृक्षं प्रतिच्छादयति २४ शुम्भन्याप्लुत्य २५ ये अन्ता इत्याच्छादयति २६ नवं वसान इत्याव्रजति २७ पूर्वपरं यत्र नाधिगच्छेद्ब्रह्मापरमिति कुर्यात् २८ गौर्दक्षिणा प्रतीवाहः २९ जीवं रुदन्ति यदीमे कोशन इति जुहोति ३० एष सौर्यो विवाहः ३१ ब्रह्मापरमिति ब्राह्मयः ३२ आवृतः प्राजापत्याः प्राजापत्याः ३३ ५ ७९

इत्यथर्ववेदे कौशिकसूत्रे दशमोऽध्यायः समाप्तः

अथ पितृमेधं व्याख्यास्यामः १ दहननिधानदेशे परिवृक्षाणि निधानकाल इति ब्राह्मणोक्तम् २ दुर्बलीभवन्तं शालातृणेषु दर्भानास्तीर्य स्योनास्मै भवेत्यवरोहयति ३ मन्त्रोक्तावनुमन्त्रयते ४ यत्ते कृष्ण इत्यवदीपयति ५ आहिताग्नौ प्रेते संभारान्संभरति ६ आज्यं च पृषदाज्यं चाजं च गां च ७ वसनं पञ्चमम् ८ हिरण्यं षष्ठम् ९ शरीरं नान्वालभते १० अन्यं चेष्टन्तमनुमन्त्रयते ११ शान्त्युदकं करोत्यसकलं चातनानां चान्वावपते १२ शान्त्युदकोदकेन केशश्मश्रुरोमनखानि संहारयन्ति १३ आप्लावयन्ति १४ अनुलिम्पन्ति १५ स्रजोऽभिहरन्ति १६ एवंस्नातमलंकृतमहतेनावाग्दशेन वसनेन प्रच्छादयत्येतत्ते देव एतत्त्वा वासः प्रथमं न्वागन्निति १७ अपेममित्यग्निषु जुहोति १८ उखाः कुर्वन्ति १९ ताः शकृदाभ्यन्तरं लिम्पन्ति शुष्केण वा पूरयन्ति २० ताः पृथगग्निभिः संतापयन्त्या शकृदादीपनात् २१ तेषां हरणानुपूर्वमाहवनीयं प्रथमं ततो दक्षिणाग्निं ततो गार्हपत्यम् २२ अथ विदेशे प्रेतस्या रोहत जनित्रीं जातवेदस इति पृथगरणीष्वग्नीन्समारोपयन्ति २३ तेषु यथोक्तं करोति २४ अपि वान्यवत्साया वा संधिनीक्षीरेणैकशलाकेन वा मन्थेनाग्निहोत्रं जुहोत्या दहनात् २५ दर्शपूर्णमासयोः कृष्णकतण्डुलानां तस्या आज्येन नान्तं न बहिः २६ पलालानि बर्हिः २७ तिल्पिञ्जया इध्माः २८ ग्रहानाज्यभागौ पुरस्ताद्धोमसंस्थितहोमानुद्धृत्य २९ प्राणापानावरुद्ध्यै निधनाभिर्जुहुयात् ३० अथोभयोरुत्तिष्ठेत्युत्थापयति ३१ प्र च्यवस्वेति त्रिः संहापयति यावत्कृत्वश्चोत्थापयति ३२ एवमेव कूर्दीं जघने निबध्य ३३ इमौ युनज्मीति गावौ

युनक्ति पुरुषौ वा ३४ उत्तिष्ठ प्रेहि प्र च्यवस्वोदन्वतीत एतेऽग्नीषोमेदं पूर्वमिति हरिणीभिर्हरेयुरति द्रवेत्यष्टभिः ३५ इदं त इत्यग्निमग्रतः ३६ प्रजानत्यघ्न्य इति जघन्यं गामेधमग्निं परिणीय ३७ स्योनास्मै भवेत्युत्तरतोऽग्नेः शरीरं निदधाति ३८ अध्वर्यव इष्टिं निर्वपन्ति ३९ तस्यां यथादेवतं पुरस्ताद्धोमसंस्थितहोमानुद्धृत्य ४० प्राणापानावरुद्ध्यै निधनाभिर्जुहुयात् ४१ अथोभयोरपेत ददामीति शान्त्युदकं कृत्वा संप्रोक्षणीभ्यां काम्पीलशाखया दहनं संप्रोक्ष्य ४२ उदीरतामित्युद्धृत्याभ्युक्ष्य लक्षणं कृत्वा पुनरभ्युक्ष्य प्राग्दक्षिणमेधश्चिन्वन्ति ४३ इयं नारीति पत्नीमुपसंवेशयति ४४ उदीर्ष्वेत्युत्थापयति ४५ यद्धिरण्यं बिभर्ति तद्दक्षिणे पाणावादायाज्येनाभिघार्य ज्येष्ठेन पुत्रेणादापयतीदं हिरण्यमिति ४६ स्वर्गं यत इति दक्षिणं हस्तं निर्माजयति ४७ दण्डं हस्तादिति मन्त्रोक्तं ब्राह्मणस्यादापयति ४८ धनुर्हस्तादिति क्षत्रियस्य ४९ अष्ट्रामिति वैश्यस्य ५० इदं पितृभ्य इति दर्भानेधान्स्तृणाति ५१ तत्रैनमुत्तानमादधीतेजानश्चित्तमारुक्षदग्निमिति ५२ प्राच्यां त्वा दिशीति प्रतिदिशम् ५३ नेत्युपरिबभ्रवः ५४ अनुमन्त्रयते ५५ अथास्य सप्तसु प्राणेषु सप्त हिरण्यशकलान्यवास्यत्यमृतमस्यमृतत्वायामृतमस्मिन्धेहीति ५६ १ ८०

अथाहिताग्नेर्दर्भेषु कृष्णाजिनमन्तर्लोमास्तीर्य १ तत्रैनमुत्तानमाधाय २ अथास्य यज्ञपात्राणि पृषदाज्येन पूरयित्वानुरूपं निदधति ३ दक्षिणे हस्ते जुहूम् ४ सव्य उपभृतम् ५ कण्ठे ध्रुवां मुखेऽग्निहोत्रहवणीं नासिकयोः स्रुवम् ६ तान्यनुमन्त्रयते जुहूर्दाधार द्यां ध्रुव आ रोहेति ७ ललाटे प्राशित्रहरणम् ८ इममग्ने चमसमिति शिरसीडाचमसम् ९ देवा यज्ञमित्युरसि पुरोडाशम् १० दक्षिणे पार्श्वे स्फ्यं सव्य उपवेषम् ११ उदरे पात्रीम् १२ अष्ठीवतोरुलूखलमुसलम् १३ श्रोण्योः शकटम् १४ अन्तरेणोरू अन्यानि यज्ञपात्राणि १५ पादयोः शूर्पम् १६ अपो मृन्मयान्युपहरन्ति १७ अयस्मयानि निदधति १८ अमा पुत्रा च दृषत् १९ अथोभयोरपश्यं युवतिं प्रजानत्यघ्न्य इति जघन्यां गां प्रसव्यं परिणीयमानामनुमन्त्रयते २० तां नैर्ऋतेन जघनताघ्नन्त उपवेशयन्ति २१ तस्याः पृष्ठतो वृक्कावुद्धार्य पाण्योरस्यादधत्यति द्रव श्वानाविति २२ दक्षिणे दक्षिणं सव्ये सव्यम् २३ हृदये हृदयम् २४ अग्नेर्वर्मेति वपया सप्तछिद्रया मुखं प्रच्छादयन्ति २५ यथागात्रं गात्राणि २६

दक्षिणैर्दक्षिणानि सव्यैः सव्यानि २७ अनुबद्धशिरःपादेन गोशालां चर्मणा-वच्छाद्य २८ अजो भाग उक्त्वा वहन्त्विति दक्षिणतोऽजं बध्नाति २९ अस्माद्वै त्वमजायथा अयं त्वदधि जायतामसौ स्वाहेत्युरसि गृह्ये जुहोति ३० तथाग्निषु जुहोत्यग्नये स्वाहा कामाय स्वाहा लोकाय स्वाहेति ३१ दक्षिणाग्नावित्येके ३२ मैनमग्ने वि दहः शं तप आ रभस्व प्रजानन्त इति कनिष्ठ आदीपयति ३३ आदीप्ते स्रुवेण यामान्होमाञ्जुहोति परेयिवांसं प्रवतो महीरिति ३४ यमो नो गातुं प्रथमो विवेदेति द्वे प्रथमे ३५ अङ्गिरसो नः पितरो नवग्वा इति संहिताः सप्त ३६ यो ममार प्रथमो मर्त्यानां ये नः पितुः पितरो ये पितामहा इत्येकादश ३७ अथ सारस्वताः ३८ सरस्वतीं देवयन्तो हवन्ते सरस्वतीं पितरो हवन्ते सरस्वति या सरथं ययाथ सरस्वति व्रतेषु त इदं ते हव्यं घृतवत्सरस्वतीन्द्रो मा मरुत्वानिति ३९ दक्षिणतोऽन्यस्मिन्ननुष्ठाता जुहोति ४० सर्वैरुपतिष्ठन्ति त्रीणि प्रभृतिभिर्वा ४१ अपि वानुष्ठानीभिः ४२ एता अनुष्ठान्यः ४३ मैनमग्ने वि दह इतिप्रभृत्यव सृजेति वर्जयित्वा सहस्रनीथा इत्यातः ४४ आ रोहत जनित्रीं जातवेदस इति पञ्चदशभिराहिताग्निम् ४५ मित्रावरुणा परि मामधातामिति पाणी प्रक्षालयते ४६ वर्चसा मामित्याचामति ४७ विवस्वान्न इत्युत्तरतोऽन्यस्मिन्ननुष्ठाता जुहोति ४८ २ ८१

यवीयःप्रथमानि कर्माणि प्राङ्मुखानां यज्ञोपवीतिनां दक्षिणावृताम् १ अथैषां सप्तसप्त शर्कराः पाणिष्वावपते २ तासामेकैकां सव्येनावाचीनहस्तेनावकिरन्तोऽनवेक्षमाणा व्रजन्ति ३ अपाघेनानुमन्त्रयते ४ सर्वेऽग्रतो ब्रह्मणो व्रजन्ति ५ मा प्र गामेति जपन्त उदकान्ते व्यपाद्ये जपन्ति ६ पश्चादवसिञ्चति ७ उदुत्तममिति ज्येष्ठः ८ पयस्वतीरिति ब्रह्मोक्ताः पिञ्जूलीरावपति ९ शान्त्युदकेनाचम्याभ्युक्ष्याश्मावतीमिति नदीं तारयते १० नक्षत्रं दृष्ट्वोपतिष्ठते नक्षत्राणां मा संकाशश्च प्रतीकाशश्चावतामिति ११ शाम्याकीः समिध आधायाग्रतो ब्रह्मा जपति १२ यस्य त्रया गतमनुप्रयन्ति देवा मनुष्याः पशवश्च सर्वे । तं नो देवं मनो अधि ब्रवीतु सुनीतिर्नो नयतु द्विषते मा रधामेति शान्त्युदकेनाचम्याभ्युक्ष्य १३ निस्सालामिति शालानिवेशनं संप्रोक्ष्य १४ ऊर्जं बिभ्रदिति प्रपादयति १५ नदीमालम्भयति गामग्निमश्मानं च १६ यवोऽसि यवयास्मद्द्वेषो यवयारातिमिति यवान् १७ खल्वकास्येति खल्वान्खलकुलांश्च १८ व्यपाद्याभ्यां शाम्याकीराधापयति १९ तासां धूमं भक्षयन्ति २०

यद्यत्क्रव्याद्दृह्येद्यदि क्रव्यादा नान्तेऽपरेद्युः
दिवो नभः शुक्रं पयो दुहाना इषमूर्जं पिन्वमानाः

अपां योनिमपाध्वं स्वधा याश्चकृषे जीवंस्तास्ते सन्तु मधुश्चुत इत्यग्नौ स्थालीपाकं निपृणाति २१ आदहने चापि वान्यवत्सां दोहयित्वा तस्याः पृष्ठे जुहोति वैश्वानरे हविरिदं जुहोमीति २२ तस्याः पयसि २३ स्थालीपाक इत्येके २४ ये अग्नय इति पालाश्या दर्व्या मन्थमुपमथ्य काम्पीलीभ्यामुपमन्थनीभ्यां तृतीयस्यामस्थीन्यभिजुहोति २५ उप द्यां शं ते नीहार इति मन्त्रोक्तान्यवदाय २६ क्षीरत्सिक्तेन ब्राह्मणस्यावसिञ्चति मधूत्सिक्तेन क्षत्रियस्योदकेन वैश्यस्य २७ अव सृजेत्यनुमन्त्रयते २८ मा ते मनो यत्ते अङ्गमिति संचिनोति पच्छः २९ प्रथमं शीर्षकपालानि ३० पश्चात्कलशे समोप्य सर्वसुरभिचूर्णैरवकीर्योत्थापनीभिरुत्थाप्य हरिणीभिर्हरेयुः ३१ मा त्वा वृक्ष इति वृक्षमूले निदधाति ३२ स्योनास्मै भवेति भूमौ त्रिरात्रमरसाशिनः कर्माणि कुर्वते ३३ दशरात्र इत्येके ३४ यथाकुलधर्मं वा ३५ ऊर्ध्वं तृतीयस्या वैवस्वतं स्थालीपाकं श्रपयित्वा विवस्वान्न इति जुहोति ३६ युक्ताभ्यां तृतीयाम् ३७ आनुमतीं चतुर्थीम् ३८ शेषं शान्त्युदकेनोपसिच्याभिमन्त्र्य प्राशयति ३९ आ प्र च्यवेथामिति गावावुपयच्छति ४० एयमगन्निति दशगवावराध्या दक्षिणा ४१ द्वादशरात्रं कर्ता यमव्रतं चरेत् ४२ एकचैलस्त्रिचैलो वा ४३ हविष्यभक्षः ४४ सायंप्रातरुपस्पृशेत् ४५ ब्रह्मचारी व्रत्यधः शयीत ४६ स्वस्त्ययनानि प्रयुञ्जीत ४७ ३ ८२

पितॄन्निधास्यन्संभारान्संभरति १ एकादश चरूञ्चक्रकृतान्कारयति २ शतातृणसहस्रातृणौ च पाशीमूषं सिकताः शङ्खं शालूकं सर्वसुरभिशमीचूर्णकृतं शान्तवृक्षस्य नावं त्रिपादकम् ३ द्वे निःशीयमाने नीललोहिते सूत्रे सव्यरज्जुं शान्तवृक्षस्य चतुरः शङ्कूंश्चतुरः परिधीन्वारणं शामीलमौदुम्बरं पालाशं वृक्षस्य शान्तौषधीः ४ माघे निदध्यान्माघं भूदिति ५ शरदि निदध्याच्छाम्यत्वघमिति ६ निदाघे निदध्यान्निदह्यतामघमिति ७ अमावास्यायां निदध्यादमा हि पितरो भवन्ति ८ अथावसानम् ९ तद्यत्समं समूलमविदग्धं प्रतिष्ठितं प्रागुदक्प्रवणम् १० यत्राकण्टका वृक्षाश्चौषधयश्च ११ उन्नतं स्वर्गकामश्च १२ श्वोऽमावास्येति गां कारयते १३ तस्याः सव्यं चापघनं

प्रपाकं च निधाय १४ भिक्षां कारयति १५ ग्रामे यामसारस्वतान्होमान्हुत्वा १६ संप्रोक्षणीभ्यां काम्पीलशाखया निवेशनमनुचर्य १७ प्राग्दक्षिणं शाखां प्रविध्य सीरेण कर्षयित्वा शाखाभिः परिवार्य १८ पुनर्देहीति वृक्षमूलादादत्ते १९ यत्ते कृष्ण इति भूमेर्वसने समोप्य सर्वसुरभिचूर्णैरवकीर्योत्थापनीभिरुत्था- प्य हरिणीभिर्हरेयुः २० अविदन्तो देशात्पांसून् २१ अपि वोदकान्ते वसनमा- स्तीर्यासाविति ह्वयेत् २२ तत्र यो जन्तुर्निपतेत्तमुत्थापनीभिरुत्थाप्य हरिणी- भिर्हरेयुः २३ अपि वा त्रीणि षष्टिशतानि पलाशत्सरूणाम् २४ ग्रामे दक्षि- णोदग्द्वारं विमितं दर्भैरास्तारयति २५ उत्तरं जीवसंचरो दक्षिणं पितृसंचरः २६ अनस्तमित आ यातेत्यायापयति २७ आच्या जान्वित्युपवेशयति २८ सं विशन्त्विति संवेशयति २९ एतद्वः पितरः पात्रमिति त्रीण्युदकंसान्निनयति ३० त्रीन्स्नातानुलिप्तान्ब्राह्मणान्मधुमन्थं पाययति ३१ ब्रह्मणे मधुपर्कमाहारयति ३२ गां वेदयन्ते ३३ कुरुतेत्याह ३४ तस्या दक्षिणमर्धं ब्राह्मणान्भोजयति सव्यं पितॄन् ३५ ४ ८३

वह वपां जातवेदः पितृभ्यो यत्रैतान्वेत्थ निहितान्पराके । मेदसः कुल्या उप तान्स्रवन्तु सत्या एषामाशिषः सन्तु कामाः स्वाहा स्वधेति वपायास्त्रिर्जुहोति १ इमं यमेति यमाय चतुर्थीम् २ एकविंशत्या यवैः कृशरं रन्धयति युतम- न्यत्प्रपाकं च ३ सयवस्य जीवाः प्राश्नन्ति ४ अथेतरस्य पिण्डं निपृणाति ५ य ते मन्थमिति मन्त्रोक्तं विमिते निपृणाति ६ तदुद्धृतोष्महर्तारो दासा भुञ्जते ७ वीणा वदन्त्वित्याह ८ महयत पितॄनिति रिक्तकुम्भं विमितमध्ये निधाय तं जरदुपानहाघ्नन्ति ९ कस्ये मृजाना इति त्रिः प्रसव्यं प्रकीर्णकेश्यः परियन्ति दक्षिणानूरूनाघ्नानाः १० एवं मध्यरात्रेऽपररात्रे च ११ पुरा विवाहात्समांसः पिण्डपितृयज्ञः १२ उत्थापनीभिरुत्थाप्य हरिणीभिर्हरेयुः १३ अथावसायेति पश्चात्पूर्वकृतेभ्यः पूर्वाणि पूर्वेभ्योऽपराणि यवीयसाम् १४ प्राग्दक्षिणां दिशमभ्युत्तरामपरां दिशमभितिष्ठन्ति १५ यथा चितिं तथा श्मशानं दक्षि- णापरां दिशमभि प्रवणम् १६ ५ ८४

अथ मानानि १ दिष्टिकुदिष्टिवितस्तिनिमुष्ट्यरत्निपदप्रक्रमाः २ प्रादेशेन धनुषा चेमां मात्रां मिमीमह इति ३ सप्त दक्षिणतो मिमीते सप्तोत्तरतः पञ्च पुरस्तात्त्रीणि पश्चात् ४ नव दक्षिणतो मिमीते नवोत्तरतः सप्त पुरस्तात्पञ्च

पश्चात् ५ एकादश दक्षिणतो मिमीत एकादशोत्तरतो नव पुरस्तात्सप्त पश्चात् ६ एकादशभिर्देवदर्शिनाम् ७ अयुग्ममानानि परिमण्डलानि चतुरस्राणि वा शौनकिनाम् ८ तथा हि दृश्यन्ते ९ यावान्पुरुष ऊर्ध्वबाहुस्तावानग्निश्चितः १० सव्यानि दक्षिणाद्वारारायुग्मशिलान्ययुग्मेष्टिकानि च ११ इमां मात्रां मिमीमह इति दक्षिणतः सव्यरज्जुं मीत्वा १२ वारयतामघमिति वारणं परिधिं परिदधाति शङ्कुं च निचृतति १३ पुरस्तान्मीत्वा शमेभ्योऽस्त्वघमिति शामीलं परिधिं परिदधाति शङ्कुं च निचृतति १४ उत्तरतो मीत्वा शाम्यत्वघमित्यौ-दुम्बरं परिधिं परिदधाति शङ्कुं च निचृतति १५ पश्चान्मीत्वा शान्तमघमिति पालाशं परिधिं परिदधाति शङ्कुं च निचृतति १६ अमासीत्यनुमन्त्रयते १७ अक्ष्णया लोहितसूत्रेन निबध्य १८ स्तुहि श्रुतमिति मध्ये गर्तं खात्वा पाशिसिकतोषोदुम्बरशङ्खशालूकसर्वसुरभिशमीचूर्णानि निवपति १९ निः-शीयतामघमिति निःशीयमानमास्तृणाति २० असंप्रत्यघम् २१ वि लुम्पता-मघमिति परि चैलं दूर्शं विलुम्पति २२ उक्तो होमो दक्षिणत स्तरणं च २३ एतदा रोह ददामीति कनिष्ठो निवपति २४ एदं बर्हिरिति स्थितसूनुर्यथापरु संचिनोति २५ मा ते मनो यत्ते अङ्गमिन्द्रो मोदपूरित्यातोऽनुमन्त्रयते २६ धानाः सलिङ्गाभिरावपति २७ ९ ८५

इदं कसाम्ब्विति सजातानवेक्षयति १ ये च जीवा ये ते पूर्वे परागता इति सर्पिर्मधुभ्यां चरुं पूरयित्वा शीर्षदेशे निदधाति २ अपूपवानिति मन्त्रोक्तं दिक्ष्वष्टमदेशेषु निदधाति ३ मध्ये पचन्तम् ४ सहस्रधारं शतधारमि-त्यद्भिरभिविष्यन्द्य ५ पर्णो राजेति मध्यमपलाशैरभिनिदधाति ६ ऊर्जो भाग इत्यश्मभिः ७ उत्ते स्तभ्नामीति लोगान्यथापरु ८ निःशीयतामघमिति निःशीयमानेनावछाद्य दर्भैरवस्तीर्य ९ इदमिद्वा उ नोप सर्पासौ हा इति चिन्वन्ति १० यथा यमायेति संश्रित्य ११ शृणात्वघमित्युपरिशिर स्तम्ब-मादधाति १२ प्रतिषिद्धमेकेषाम् १३ अकल्माषाणां काण्डानामष्टाङ्गुलीं तेजनीमन्तर्हितमघमिति ग्रामदेशादुच्छ्रयति १४ प्रसव्यं परिषिच्य कुम्भा-न्भिन्दन्ति १५ समेतेत्यपरस्यां श्मशानस्रक्त्यां ध्रुवनान्युपयच्छन्ते १६ पश्चा-दुत्तरतोऽग्नेर्वर्चसा मां विवस्वानिन्द्र क्रतुमित्यातः १७ समिन्धत इति पश्चा-त्संकसुकमुद्दीपयति १८ अस्मिन्वयं यद्रिप्रं सीसे मृड्ढ्वमित्यभ्यवनेजयति १९ कृष्णोर्णया पाणिपादान्निमृज्य २० इमे जीवा उदीचीनैरिति मन्त्रोक्तम्

२१ त्रिः सप्तेति कूद्या पदानि योपयित्वा श्मशानात् २२ मृत्योः पदमिति द्वितीयया नावः २३ परं मृत्यो इति प्राग्दक्षिणं कूदीं प्रविध्य २४ सप्त नदीरूपाणि कारयित्वोदकेन पूरयित्वा २५ आ रोहत सवितुर्नावमेतां सुत्रामाणं महीमू ष्विति सहिरण्यां सयवां नावमारोहयति २६ अश्मन्वती रीयत उत्तिष्ठता प्र तरता सखाय इत्युदीचस्तारयति २७ शर्कराद्या समिदाधानात् २८ वैवस्वतादि समानम् २९ प्राप्य गृहान्समानः पिण्डपितृयज्ञः ३० ७ ८६

अथ पिण्डपितृयज्ञः १ अमावास्यायां सायं न्यह्नेऽहनि विज्ञायते २ मित्रावरुणा परि मामधातामिति पाणी प्रक्षालयते ३ वर्चसा मामित्याचामति ४ पुनः सव्येनाचमनादपसव्यं कृत्वा प्रैषकृतं समादिशति ५ उलूखलमुसलं शूर्पं चरुं कंसं प्रक्षालय बर्हिरुदकुम्भमा हरेति ६ यज्ञोपवीती दक्षिणपूर्वमन्तर्देशमभिमुखः शूर्प एकपवित्रान्तर्हितान्हविष्यान्निर्वपति ७ इदमग्नये कव्यवाहनाय स्वधा पितृभ्यः पृथिविषद्ध्य इतीदं सोमाय पितृमते स्वधा पितृभ्यः सोमवद्ध्यः पितृभ्यो वान्तरिक्षसद्ध्य इतीदं यमाय पितृमते स्वधा पितृभ्यश्च दिविषद्ध्य इति त्रीनवाचीनकाशीन्निर्वपति ८ उलूखल ओप्य त्रिरवहन्तीदं वः पितरो हविरिति ९ यथा हविस्तथा परिचरति १० हविर्ह्येव पितृयज्ञः ११ प्रैषकृतं समादिशति चरुं प्रक्षालयाधिश्रयाप ओप्य तण्डुलानावपस्व नेक्षणेन योधयन्नास्व मा शिरो ग्रहीः १२ शिरोग्रहं परिचक्षते १३ बाह्येनोपनिष्क्रम्य यज्ञोपवीती दक्षिणपूर्वमन्तर्देशमभिमुख उदीरतामिति कर्षूं खनति प्रादेशमात्रीं तिर्यगङ्गुरिम् १४ अवागङ्गुरिं पर्वमात्रीमित्येके १५ अपहता असुरा रक्षांसि ये पितृषद इति प्राग्दक्षिणं पांसूनुदूहति १६ कर्षूं च पाणी च प्रक्षाल्यैतद्वः पितरः पात्रमिति कर्षूमुदकेन पूरयित्वा १७ अन्तरुपातीत्य मस्तुना नवनीतेन वा प्रतिनीय दक्षिणाञ्चमुद्वास्य १८ द्वे काष्ठे गृहीत्वोशन्त इत्यादीपयति १९ आदीप्तयोरेकं प्रतिनिदधाति २० इहैवैधि धनसनिरित्येकं हृत्वा २१ पांसुष्वाधायोपसमादधाति ये निखाताः समिन्धते ये तातृषुर्ये सत्यास इति २२ संभारानुपसादयति २३ पर्युक्षणीं बर्हिरुदकुम्भं कंसं दर्विमाज्यमायवनं चरुं वासांस्याञ्जनमभ्यञ्जनमिति २४ यदत्रोपसमाहार्यं भवति तदुपसमाहृत्य २५ अतो यज्ञोपवीती पित्र्युपवीती बर्हिर्गृहीत्वा विचृत्य संनहनं दक्षिणापरमष्टमदेशमभ्यवास्येत् २६ बर्हिरुदकेन संप्रोक्ष्य

बर्हिषदः पितर उपहूता नः पितरोऽग्निष्वात्ताः पितरो ये नः पितुः पितरो येऽस्माकमिति प्रस्तृणाति २७ आयापनादीनि त्रीणि २८ उदीरतामिति तिसृभिरुदपात्राण्यन्वृचं निनयेत् २९ अतः पित्र्युपवीती यज्ञोपवीती ये दस्यव इत्युभयत आदीप्तमुल्मुकं त्रिः प्रसव्यं परिहृत्य निरस्यति ३० पर्युक्ष्य ३१
८ ८७

ये रूपाणि प्रतिमुञ्चमाना असुराः सन्तः स्वधया चरन्ति । त्वं तानग्ने अप सेध दूरान्सत्या नः पितॄणां सन्त्वाशिषः स्वाहा स्वधेति हुत्वा कुम्भीपाकमभिघारयति १ अग्नये कव्यवाहनायेति जुहोति २ यथानिरुप्तं द्वितीयाम् ३ यमाय पितृमते स्वधा पितृभ्य इति तृतीयाम् ४ यद्वो अग्निरिति सायवनांस्तण्डुलान् ५ सं बर्हिरिति सदर्भांस्तण्डुलान्पर्युक्ष्य ६ अतो यज्ञोपवीती पित्र्युपवीती दर्व्योद्धरति ७ द्यौर्दर्विरक्षितापरिमितानुपदस्ता सा यथा द्यौर्दर्विरक्षितापरिमितानुपदस्तैवा प्रततामहस्येयं दर्विरक्षितापरिमितानुपदस्ता ८ अन्तरिक्षं दर्विरक्षितापरिमितानुपदस्ता सा यथान्तरिक्षं दर्विरक्षितापरिमितानुपदस्तैवा ततामहस्येयं दर्विरक्षितापरिमितानुपदस्ता ९ पृथिवी दर्विरक्षितापरिमितानुपदस्ता सा यथा पृथिवी दर्विरक्षितापरिमितानुपदस्तैवा ततस्येयं दर्विरक्षितापरिमितानुपदस्तेति १० उद्धृत्याज्येन संनीय त्रीन्पिण्डान्संहतान्निदधात्येतत्ते प्रततामहेति ११ दक्षिणतः पत्नीभ्य इदं वः पत्न्य इति १२ इदमाशंसूनामिदमाशंसमानानां स्त्रीणां पुंसां प्रकीर्णावशीर्णानां येषां वयं दातारो ये चास्माकमुपजीवन्ति । तेभ्यः सर्वेभ्यः सपत्नीकेभ्यः स्वधावदक्षय्यमस्त्विति त्रिः प्रसव्यं तण्डुलैः परिकिरति १३ पिञ्जूलीराञ्जनं सर्पिषि पर्यस्याद्भ्वं पितर इति न्यस्यति १४ वद्भ्वं पितरो मा वोऽतोऽन्यत्पितरो योयुवतेति सूत्राणि १५ अञ्जते व्यञ्जत इत्यभ्यञ्जनम् १६ आज्येनाविच्छिन्नं पिण्डानभिघारयति ये च जीवा ये ते पूर्वे परागता इति १७ अत्र पितरो मादयध्वं यथाभागं यथालोकमावृषायध्वमिति १८ अत्र पत्न्यो मादयध्वं यथाभागं यथालोकमावृषायध्वमिति १९ योऽसावन्तरग्निर्भवति तं प्रदक्षिणमवेक्ष्य तिस्रस्तामीस्ताम्यति २० प्रतिपर्यावृत्यामीमदन्त पितरो यथाभागं यथालोकमावृषायिषतेति २१ अमीमदन्त पत्न्यो यथाभागं यथालोकमावृषायिषतेति २२ आपो अग्निमित्यद्भिरग्निमवसिच्य २३ पुत्रं पौत्रमभितर्पयन्तीरित्याचामत मम प्रततामहास्ततामहास्तताः सपत्नीकास्तृप्यन्त्वाचाम-

न्त्विति प्रसव्यं परिषिच्य २४ वीरान्मे प्रततामहा दत्त वीरान्मे ततामहा दत्त वीरान्मे पितरो दत्त पितॄन्वीरान्याचति २५ नमो वः पितर इत्युपतिष्ठते २६ अक्षन्नित्युत्तरसिचमवधूय २७ परा यातेति परायापयति २८ अतः पित्र्युपवीती यज्ञोपवीती यन्न इदं पितृभिः सह मनोऽभूत्तदुपाह्वयामीति मन उपाह्वयति २९ ९ ८८

मनो न्वा ह्वामहे नारशंसेन स्तोमेन
पितॄणां च मन्मभिः

आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे
ज्योक्च सूर्यं दृशे

पुनर्नः पितरो मनो ददातु दैव्यः जनः
जीवं व्रातं सचेमहि

वयं सोम व्रते तव मनस्तनूषु बिभ्रतः
प्रजावन्तः सचेमहि

ये सजाताः सुमनसो जीवा जीवेषु मामकाः
तेषां श्रीमयि कल्पतामस्मिन्गोष्ठे शतं समा इति १

यच्चरुस्थाल्यामोदनावशिष्टं भवति तस्योष्मभक्षं भक्षयित्वा ब्राह्मणाय दद्यात् २ यदि ब्राह्मणो न लभ्येताप्स्वभ्यवहरेत् ३ निजाय दासायेत्येके ४ मध्यमपिण्डं पत्न्यै पुत्रकामायै प्रयच्छति ५

आ धत्त पितरो गर्भं कुमारं पुष्करस्रजम्
यथेह पुरुषोऽसत्

आ त्वारुक्षद्वृषभः पृश्निरग्रियो मेधाविनं पितरो गभमा दधः
आ त्वायं पुरुषो गमेत्पुरुषः पुरुषादधि
स ते श्रैष्ठ्याय जायतां स सोमे साम गायत्विति ६

यद्यन्या द्वितीया भवत्यपरं तस्यै ७ प्राग्रतमं श्रोत्रियाय ८ अथ यस्य भा-
र्या दासी वा प्रद्राविणी भवति येऽमी तण्डुलाः प्रसव्यं परिकीर्णा भवन्ति
तांस्तस्यै प्रयच्छति ९

अर्वाच्युपसंक्रमे मा पराच्युप वस्तथा
अन्नं प्रानस्य बन्धनं तेन बध्नामि त्वा मयीति १०

पर्युक्षणीं समिधश्चादाय मा प्र गामेत्याव्रज्योर्जं बिभ्रदिति गृहानुपतिष्ठते ११

रमध्वं मा बिभीतनास्मिन्गोष्ठे करीषिणः
ऊर्जं दुहानाः शुचयः शुचिव्रता गृहा जीवन्त उप वः सदेम

ऊर्जं मे देवा अददुरूर्जं मनुष्या उत
ऊर्जं पितृभ्य आहार्षमूर्जस्वन्तो गृहा मम

पयो मे देवा अददुः पयो मनुष्या उत
पयः पितृभ्य आहार्षं पयस्वन्तो गृहा मम

वीर्यं मे देवा अददुर्वीर्यं मनुष्या उत
वीर्यं पितृभ्य आहार्षं वीरवन्तो गृहा ममेति १२

अन्तरुपातीत्य समिधोऽभ्यादधाति
अयं नो अग्निरध्यक्षोऽयं नो वसुवित्तमः
अस्योपसद्ये मा रिषामायं रक्षतु नः प्रजाम्

अस्मिन्सहस्रं पुष्यास्मैधमानाः स्वे गृहे
इमं समिन्धिषीमह्यायुष्मन्तः सुवर्चसः

त्वमग्न ईडित आ त्वाग्न इधीमहीति १३ अभूहूत इत्यग्निं प्रत्यानयति १४
यदि सर्वः प्रणीतः स्याद्दक्षिणाग्नौ त्वेतदाहिताग्नेः १५ गृह्येष्वनाहिताग्नेः १६
इदं चिन्मे कृतमस्तीदं चिच्छक्नवानि । पितरश्चिन्मा वेदन्निति १७ यो ह

यजते तं देवा विदुर्यो ददाति तं मनुष्या यः श्राद्धानि कुरुते तं पितरस्तं पितरः १८ १० ८९

इत्यथर्ववेदे कौशिकसूत्र एकादशोऽध्यायः समाप्तः

मधुपर्कमाहारयिष्यन्दर्भानाहारयति १ अथ विष्टरान्कारयति २ स खल्वेकशाखमेव प्रथमं पाद्यं द्विशाखमासनं त्रिशाखं मधुपर्काय ३ स यावतो मन्येत तावत उपादाय विविच्य संपर्याप्य मूलानि च प्रान्तानि च यथाविस्तीर्ण इव स्यादित्युपोत्कृष्य मध्यदेशेऽभिसंनह्यति ४ ऋतेन त्वा सत्येन त्वा तपसा त्वा कर्मणा त्वेति संनह्यति ५ अथ ह सृजत्यतिसृष्टो द्वेष्टा योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ६ अस्य च दातुरिति दातारमीक्षते ७ अथोदकमाहारयति पाद्यं भो इति ८ हिरण्यवर्णाभिः प्रतिमन्त्र्य दक्षिणं पादं प्रथमं प्रकर्षति । मयि ब्रह्म च तपश्च धारयाणीति ९ दक्षिणे प्रक्षालिते सव्यं प्रकर्षति । मयि क्षत्रं च विशश्च धारयाणीति १० प्रक्षालितावनुमन्त्रयते । इमौ पादाववनिक्तौ ब्राह्मणं यशसावताम् । आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे ११ अस्य च दातुरिति दातारमीक्षते १२ अथासनमाहारयति । सविष्टरमासनं भो इति १३ तस्मिन्प्रत्यङ्मुख उपविशति १४ विमृग्वरीं पृथिवीमित्येतया विष्टरे पादौ प्रतिष्ठाप्याधिष्ठितो द्वेष्टा योऽस्मान्द्वेष्टि यं च वयं द्विप्मः १५ अस्य च दातुरिति दातारमीक्षते १६ अथोदकमाहारयत्यर्घ्यं भो इति १७ तत्प्रतिमन्त्रयते । अन्नानां मुखमसि मुखमहं श्रेष्ठः समानानां भूयासम् । आपोऽमतं स्थामृतं मा कृणुत दासास्माकं बहवो भवन्त्वश्वावङ्गोमन्मय्यस्तु पुष्टमों भूर्भुवः स्वर्जनदोमिति १८ तूष्णीमध्यात्मं निनयति १९ तेजोऽस्यमृतमसीति ललाटमालभते २० अथोदकमाहारयत्याचमनीयं भो इति २१ जीवाभिराचम्य २२ अथास्मै मधुपर्कं वेदयन्ते द्व्यनुचरो मधुपर्को भो इति २३ द्वाभ्यां शाखाभ्यामधस्तादेकयोपरिष्टात्सापिधानम् २४ मधु वाता ऋतायत इत्येताभिरेवाभिमन्त्रणम् २५ तथा प्रतिमन्त्रणम् २६ १ ९०

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः
माध्वीर्गावो भवन्तु नः

मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः

माध्वीर्नः सन्त्वोषधीः

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः
मधु द्यौरस्तु नः पिता १

तत्सूर्यस्य त्वा चक्षुषा प्रतीक्ष इति प्रतीक्षते २ अयुतोऽहं देवस्य त्वा सवितुरिति प्रतिगृह्य पुरोमुखं प्राग्दण्डं निदधाति ३ पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति भूमौ प्रतिष्ठाप्य ४ द्वाभ्यामङ्गुलिभ्यां प्रदक्षिणमाचाल्यानामिकयाङ्गुल्याङ्गुष्ठेन च संगृह्य प्राश्नाति ५ ओं भूस्तत्सवितुर्वरेण्यं भूः स्वाहेति प्रथमम् ६ भर्गो देवस्य धीमहि भुवः स्वाहेति द्वितीयम् ७ धियो यो नः प्रचोदयात्स्वः स्वाहेति तृतीयम् ८ वयं देवस्य धीमहि जनत्स्वाहेति चतुर्थम् ९ तुरं देवस्य भोजनं वृधत्स्वाहेति पञ्चनम् १० करत्स्वाहेति षष्ठम् ११ रुहत्स्वाहेति सप्तमम् १२ महत्स्वाहेत्यष्टमम् १३ तत्स्वाहेति नवमम् १४ शं स्वाहेति दशमम् १५ ओमित्येकादशम् १६ तूष्णीं द्वादशम् १७ तस्य भूयोमात्रमिव भुक्त्वा ब्राह्मणाय श्रोत्रियाय प्रयछेत् १८ श्रोत्रियालाभे वृषलाय प्रयच्छेत् १९ अथाप्ययं निगमो भवति । सोममेतत्पिबत यत्किं चाश्नीत ब्राह्मणाः । माब्राह्मणायोच्छिष्टं दात मा सोमं पात्वसोमप इति २० २ ९१

दधि च मधु च ब्राह्मो मधुपर्कः १ पायस ऐन्द्रो मधुपर्कः २ मधु चाज्यं च सौम्यो मधुपर्कः ३ मन्थश्चाज्यं च पौष्णो मधुपर्कः ४ क्षीरं चाज्यं च सारस्वतो मधुपर्कः ५ सुरा चाज्यं च मौसलो मधुपर्कः ६ स खल्वेष द्वये भवति सौत्रामण्यां च राजसूये च ७ उदकं चाज्यं च वारुणो मधुपर्कः ८ तैलं चाज्यं च श्रावणो मधुपर्कः ९ तैलश्च पिण्डश्च पारिव्राजको मधुपर्कः १० इति खल्वेष नवविधो मधुपर्को भवति ११ अथास्मै गां वेदयन्ते गौर्भो इति १२ तान्प्रतिमन्त्रयते । भूतमसि भवदस्यन्नं प्राणो बहुर्भव । ज्येष्ठं यन्नाम नामत ओं भूर्भुवः स्वर्जनदोमिति १३ अतिसृजति

मातादित्यानां दुहिता वसूनां स्वसा रुद्राणाममृतस्य नाभिः
प्र णो वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट

ओं तृणानि गौरत्त्वित्याह १४ सूयवसादिति प्रतिष्ठमानामनुमन्त्रयते १५ नालोहितो मधुपर्को भवति १६ नानुज्ञानमधीमह इति कुरुतेत्येव ब्रूयात् १७ स्वधिते मैनं हिंसीरिति शस्त्रं प्रयच्छति १८ पाप्मानं मेऽप जहीति कर्तारमनुमन्त्रयते १९ आग्नेयीं वपां कुर्युः २० अपि वा ब्राह्मण एव प्राश्नीयात्तद्देवतं हि तद्धविर्भवति २१ अथास्मै स्नानमनुलेपनं मालाभ्यञ्जनमिति २२ यदत्रोपसमाहार्यं भवति तदुपसमाहृत्य २३ अथोपासकाः प्राप्योपासकाः स्मो भो इति वेदयन्ते २४ तान्प्रतिमन्त्रयते । भूयांसो भूयास्म ये च नो भूयसः कार्ष्टापि च नोऽन्ये भूयांसो जायन्ताम् २५ अस्य च दातुरिति दातारमोक्षते २६ अथान्नाहाराः प्राप्यान्नाहाराः स्मो भो इति त्वेदयन्ते २७ तान्प्रतिमन्त्रयते । अन्नादा भूयास्म ये च नोऽन्नादान्कार्ष्टापि च नोऽन्येऽन्नादा भूयांसो जायन्ताम् २८ अस्य च दातुरिति दातारमीक्षते २९ आहृतेऽन्ने जुहोति यत्काम कामयमाना इत्येतया ३०

यत्काम कामयमाना इदं कृरामसि ते हविः
तन्नः सर्वं समृध्यतामथैतस्य हविषो वीहि स्वाहेति ३१

एष आचार्यकल्प एष ऋत्विक्कल्प एष संयुक्तकल्प एष विवाहकल्प एषोऽतिथिकल्प एषोऽतिथिकल्पः ३२ ३ ९२

इत्यथर्ववेदे कौशिकसूत्रे द्वादशोऽध्यायः समाप्तः

अथाद्भुतानि १ वर्षे २ यक्षेषु ३ गोमायुवदने ४ कुले कलहिनि ५ भूमिचले ६ आदित्योपप्लवे ७ चन्द्रमसश्च ८ औषस्यामनुद्यत्याम् ९ समायां दारुणायाम् १० उपतारकशङ्कायाम् ११ ब्राह्मणेष्वायुधिषु १२ दैवतेषु नृत्यत्सु च्योतत्सु हसत्सु गायत्सु १३ लाङ्गलयोः संसर्गे १४ रज्ज्वोस्तन्त्वोश्च १५ अग्निसंसर्गे १६ यमवत्सायां गवि १७ वडवागर्दभ्योर्मानुष्यां च १८ यत्र धेनवो लोहितं दुहते १९ अनडुहि धेनुं धयति २० धेनौ धेनुं धयन्त्याम् २१ आकाशफेने २२ पिपीलिकानाचारे २३ नीलमक्षानाचारे २४ मधुमक्षानाचारे २५ अनाज्ञाते २६ अवदीर्णे २७ अनुदक उदकोन्मीले २८ तिलेषु समतैलेषु २९ हविःष्वभिमृष्टेषु ३० प्रसव्येष्वावर्तेषु ३१ यूपे विरोहति ३२ उल्कायाम् ३३ धूमकेतौ सप्तर्षीनु-

पधूपयति ३४ नक्षत्रेषु पतापतेषु ३५ मांसमुखे निपतति ३६ अनग्नाववभासे ३७ अग्नौ श्वसति ३८ सर्पिषि तैले मधुनि च विष्यन्दे ३९ ग्राम्येऽग्नौ शालां दहति ४० आगान्तौ च ४१ वंशे स्फोटति ४२ कुम्भोदधाने विकसत्युखायां सक्तुधान्यां च ४३ १ ९३

अथ यत्रैतानि वर्षाणि वर्षन्ति घृतं मांसं मधु च यद्धिरण्यं यानि चाप्यन्यानि घोराणि वर्षाणि वर्षन्ति तत्पराभवति कुलं वा ग्रामो वा जनपदो वा १ तत्र राजा भूमिपतिर्विद्वांसं ब्रह्माणमिच्छेत् २ एष ह वै विद्वान्यद्भृग्वङ्गिरोवित् ३ एते ह वा अस्य सर्वस्य शमयितारः प्रालयितारो यद्भृग्वङ्गिरसः ४ स आहोपकल्पयध्वमिति ५ तदुपकल्पयन्ते कंसमहते वसने शुद्धमाज्यं शान्ता ओषधीर्नवमुदकुम्भम् ६ त्रीणि पर्वाणि कर्मणः पौर्णमास्यमावास्ये पुण्यं नक्षत्रम् ७ अपि चेदेव यदा कदा चिदार्ताय कुर्यात् ८ स्नातोऽहतवसनः सुरभिर्व्रतवान्कर्मण्य उपवसत्येकरात्रं त्रिरात्रं षड्रात्रं द्वादशरात्रं वा ९ द्वादश्याः प्रातर्यत्रैवादः पतितं भवति तत उत्तरमग्निमुपसमाधाय १० परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य परिचरणेनाज्यं परिचर्य ११ नित्यान्पुरस्ताद्धो-मान्हुत्वाज्यभागौ च १२ अथ जुहोति १३

घृतस्य धारा इह या वर्षन्ति पक्वं मांसं मधु च यद्धिरण्यम्
द्विषन्तमेता अनु यन्तु वृष्टयोऽपां वृष्टयो बहुलाः सन्तु मह्यम्

लोहितवर्षं मधुपांसुवर्षं यद्वा वर्षं घोरमनिष्टमन्यत्
द्विषन्तमेते अनु यन्तु सर्वे पराञ्चो यन्तु निवर्तमानाः

अग्नये स्वाहेति हुत्वा १४ दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् १५ वरमनड्वाहं ब्राह्मणः कर्त्रे दद्यात् १६ सीरं वैश्योऽश्वं प्रादेशिको ग्रामवरं राजा १७ सा तत्र प्रायश्चित्तिः १८ २ ९४

अथ यत्रैतानि यक्षाणि दृश्यन्ते तद्यथैतन्मर्कटः श्वापदो वायसः पुरुषरूपमिति तदेवमाशङ्क्यमेव भवति १ तत्र जुहुयात् २

यन्मर्कटः श्वापदो वायसो यदीदं राष्ट्रं जातवेदः पतानि पुरुषरक्षसमिषिरं य-त्पताति
द्विषन्तमेते अनु यन्तु सर्वे पराञ्चो यन्तु निवर्तमानाः

अग्नये स्वाहेति हुत्वा ३ दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् ४ सा तत्र प्रायश्चित्तिः ५ ३ ९५

अथ ह गोमायू नाम मण्डूकौ यत्र वदतस्तद्यन्मन्यन्ते मां प्रति वदतो मां प्रति वदत इति तदेवमाशङ्क्यमेव भवति १ तत्र जुहुयात् २

यद्गोमायू वदतो जातवेदोऽन्यया वाचाभि जञ्जभातः
रथंतरं बृहच्च सामैतद्द्विषन्तमेतावभि नानदैताम्

रथंतरेण त्वा बृहच्छमयामि बृहता त्वा रथंतरं शमयामि
इन्द्राग्नी त्वा ब्रह्मणा वावृधानावायुष्मन्तावुत्तमं त्वा कराथः

इन्द्राग्निभ्यां स्वाहेति हुत्वा ३ दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् ४ सा तत्र प्रायश्चित्तिः ५ ४ ९६

अथ यत्रैतत्कुलं कलहि भवति तन्निर्ऋतिगृहीतमित्याचक्षते १ तत्र जुहुयात् २ आरादरातिमिति द्वे ३
अयाश्चाग्नेऽस्यनभिशस्तिश्च सत्यमित्त्वमया असि
अयासा मनसा कृतोऽयास्यं हव्यमूहिषे
अया नो धेहि भेषजं

स्वाहेत्यग्नौ हुत्वा ४ तत्रैवैतान्होमाञ्जुहुयात् ५

आरादग्निं क्रव्यादे निरूहञ्जीवातवे ते परिधिं दधामि
इन्द्राग्नी त्वा ब्रह्मणा वावृधानावायुष्मन्तावुत्तमं त्वा कराथः

इन्द्राग्निभ्यां स्वाहेति हुत्वा ६ अपेत एतु निर्ऋतिरित्येतेन सूक्तेन जुहुयात् ७

अपेत एतु निर्ऋतिर्नेहास्या अपि किं चन
अपास्याः सत्वनः पाशान्मृत्यूनेकशतं नुदे

ये ते पाशा एकशतं मृत्यो मर्त्याय हन्तवे
तांस्ते यज्ञस्य मायया सर्वाँ अप यजामसि

निरितो यन्तु नैर्ऋत्या मृत्यव एकशतं परः
सेधामैषां यत्तमः प्राणं ज्योतिश्च दध्महे

ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः
तेभ्यो अस्मान्वरुणः सोम इन्द्रो विश्वे मुञ्चन्तु मरुतः स्वर्काः

ब्रह्म भ्राजदुदगादन्तरिक्षं दिवं च ब्रह्मावाधूष्टामृतेन मृत्युम्
ब्रह्मोपद्रष्टा सुकृतस्य साक्षाद्ब्रह्मास्मदप हन्तु शमलं तमश्च ८

वरमनड्वाहमिति समानम् ६ ५ ६७

अथ यत्रैतद्भूमिचलो भवति तत्र जुहुयात् १

अच्युता द्यौरच्युतमन्तरिक्षमच्युताभूमिर्दिशो अच्युता इमाः
अच्युतोऽयं रोधावरोधाद्ध्रुवो राष्ट्रे प्रति तिष्ठाति जिष्णुः

यथा सूर्यो दिवि रोचते यथान्तरिक्षं मातरिश्वाभिवस्ते
यथाग्निः पृथिवीमा विवेशैवायं ध्रुवो अच्युतो अस्तु जिष्णुः

यथा देवो दिवि स्तनयन्वि राजति यथा वर्षं वर्षकामाय वर्षति
यथापः पृथिवीमा विविशुरेवायं ध्रुवो अच्युतो अस्तु जिष्णुः

यथा पुरीषं नद्यः समुद्रमहोरात्रे अप्रमादं क्षरन्ति
एवा विशः संमनसो हवं मेऽप्रमादमिहोपा यन्तु सर्वाः

दृंहतां देवी सह देवताभिर्ध्रुवा दृढाच्युता मे ग्रस्तु भूमिः
सर्वपाप्मानमपनुद्यास्मदमित्रान्मे द्विषतोऽनु विध्यतु

पृथिव्यै स्वाहेति हुत्वा २ ग्रा त्वाहार्षं ध्रुवा द्यौः सत्यं बृहदित्येतेनानु-
वाकेन जुहुयात् ३ सा तत्र प्रायश्चित्तिः ४ ६ ९८

ग्रथ यत्रैतदादित्यं तमो गृह्णाति तत्र जुहुयात् १

दिव्यं चित्रमृतूया कल्पयन्तमृतूनामुग्रं भ्रमयन्नुदेति
तदादित्यः प्रतरन्नेतु सर्वत ग्राप इमां लोकाननुसंचरन्ति

ग्रोषधीभिः संविदानाविन्द्राग्नी त्वाभि रक्षताम्
ऋृतेन सत्यवाकेन तेन सर्वं तमो जहि

ग्रादित्याय स्वाहेति हुत्वा २ विषासहिं सहमानमित्येतेन सूक्तेन जुहुयात्
३ रोहितैरुपतिष्ठते ४ सा तत्र प्रायश्चित्तिः ५ ७ ९९

ग्रथ यत्रैतच्चन्द्रमसमुपप्रवति तत्र जुहुयात् १

राहू राजानं त्सरति स्वरन्तमैनमिह हन्ति पूर्वः
सहस्रमस्य तन्व इह नाश्याः शतं तन्वो वि नश्यन्तु

चन्द्राय स्वाहेति हुत्वा २ शकधूमं नक्षत्राणीत्येतेन सूक्तेन जुहुयात् ३
सा तत्र प्रायश्चित्तिः ४ ८ १००

ग्रथ यत्रैतदौषसी नोदेति तत्र जुहुयात् १

उदेतु श्रीरुषसः कल्पयन्ती पूल्यान्कृत्वा पलित एतु चारः
ऋृतून्बिभ्रती बहुधा विरूपान्मह्यं भव्यं विदुषी कल्पयाति

ग्रौषस्यै स्वाहेति हुत्वा २ दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् ३ सा

तत्र प्रायश्चित्तिः ४ ९ १०१

अथ यत्रैतत्समा दारुणा भवति तत्र जुहुयात् १

या समा रुशत्येति प्राजापत्यान्वि धूनुते
तृप्तिं यां देवता विदुस्तां त्वा सं कल्पयामसि

व्याधकस्य मातरं हिरण्यकुक्षीं हरिणीम्
तां त्वा सं कल्पयामसि

यत्ते घोरं यत्ते विषं तद्द्विषत्सु नि दध्मस्यमुष्मिन्निति ब्रूयात् २ शिवेना-
स्माकं समे शान्त्या सहायुषा समायै स्वाहेति हुत्वा ३ समास्त्वाग्न इत्येतेन
सूक्तेन जुहुयात् ४ सा तत्र प्रायश्चित्तिः ५ १० १०२

अथ यत्रैतदुपतारकाः शङ्कन्ते तत्र जुहुयात् १

रेवतीः शुभ्रा इषिरा मदन्तीस्त्वचो धूममनु ताः सं विशन्तु
परेणापः पृथिवीं सं विशन्त्वाप इमां लोकाननुसंचरन्तु

अद्भ्यः स्वाहेति हुत्वा २ समुत्पतन्तु प्र नभस्वेति वर्षीर्जुहुयात् ३ सा तत्र
प्रायश्चित्तिः ४ ११ १०३

अथ यत्रैतद्ब्राह्मणा आयुधिनो भवन्ति तत्र जुहुयात् १
य आसुरा मनुष्या आत्तधन्वः पुरुषमुखाश्चरानिह
देवा वयं मनुष्यास्ते देवाः प्र विशामसि

इन्द्रो नो अस्तु पुरोगवः स नो रक्षतु सर्वत
इन्द्राय स्वाहेति हुत्वा २

मा नो विदन्नमो देववधेभ्य इत्येताभ्यां सूक्ताभ्यां जुहुयात् ३ सा तत्र प्रा-
यश्चित्तिः ४ १२ १०४

अथ यत्रैतद्देवतानि नृत्यन्ति च्योतन्ति हसन्ति गायन्ति वान्यानि वा रूपाणि कुर्वन्ति य आसुरा मनुष्या मा नो विदन्नमो देववधेभ्य इत्यभयैर्जुहुयात् १ सा तत्र प्रायश्चित्तिः २ १३ १०५

अथ यत्रैतल्लाङ्गले संसृजतः पुरोडाशं श्रपयित्वा १ अरण्यस्यार्धमभिव्रज्य २ प्राचीं सीतां स्थापयित्वा ३ सीताया मध्ये प्राञ्चमिध्ममुपसमाधाय ४ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिः शम्याः परिधीन्कृत्वा ५ अथ जुहोति । वित्तिरसि पुष्टिरसि श्रीरसि प्राजापत्यानां तां त्वाहं मयि पुष्टिकामो जुहोमि स्वाहा ६

कुमुद्वती पुष्करिणी सीता सर्वाङ्गशोभनी
कृषिः सहस्रप्रकारा प्रत्यष्टा श्रीरियं मयि

उर्वीं त्वाहुर्मनुष्याः श्रियं त्वा मनसो विदुः
आशयेऽन्नस्य नो धेह्यनमीवस्य शुष्मिणः

पर्जन्यपत्नि हरिण्यभिजितास्यभि नो वद
कालनेत्रे हविषो नो जुषस्व तृप्तिं नो धेहि द्विपदे चतुष्पदे

याभिर्देवा असुरानकल्पयन्यातून्मनून्गन्धर्वान्राक्षसांश्च
ताभिर्नो अद्य सुमना उपा गहि सहस्रापोषं सुभगे रराणा

हिरण्यस्रक्पुष्करिणी श्यामा सर्वाङ्गशोभनी
कृषिर्हिरण्यप्रकारा प्रत्यष्टा श्रीरियं मयि

अश्विभ्यां देवि सह संविदाना इन्द्रेण राधेन सह पुष्ट्या न आ गहि
विशस्त्वा रासन्तां प्रदिशोऽनु सर्वा अहोरात्रार्धमासमासा आर्तवा ऋतुभिः सह

भर्त्री देवानामुत मर्त्यानां भर्त्री प्रजानामुत मानुषाणाम्
हस्तिभिरितरासैः क्षेत्रसारथिभिः सह
हिरण्यैरश्वैरा गोभिः प्रत्यष्टा श्रीरियं मयि ७

अत्र शुनासीराण्यनुयोजयेत् ८ वरमनड्वाहमिति समानम् ९ १४ १०६

अथ यत्रैतत्सृजन्त्योर्वा कृन्तन्त्योर्वा नाना तन्तू संसृजतो मनायै तन्तुं प्रथम-
मित्येतेन सूक्तेन जुहुयात् १

मनायै तन्तुं प्रथमं पश्येदन्या अतन्वत
तन्नारीः प्र ब्रवीमि वः साध्वीर्वः सन्तूर्वरीः

साधुर्वस्तन्तुर्भवतु साधुरेतु रथो वृतः
अथो होर्वरीर्यूयं प्रातर्वोढवे धावत

खर्गला इव पत्वरीरपामुग्रमिवायनम्
पतन्तु पत्वरीरिवोर्वरीः साधुना पथा

अवाच्यौ ते तोतुद्येते तोदेनाश्वतराविव
प्र स्तोममुर्वरीणां शशयानामस्ताविषम्

नारी पञ्चमयूखं सूत्रवत्कृणुते वसु
अरिष्टो अस्य वस्ता प्रेन्द्र वास उतोदिर २

वासः कर्त्रे दद्यात् ३ सा तत्र प्रायश्चित्तिः ४ १४ १०७

अथ यत्रैतदग्निनाग्निः संसृज्यते भवतं नः समनसौ समोकसावित्येतेन सू-
क्तेन जुहुयात् १

भवतं नः समनसौ समोकसावरेपसौ
मा हिंसिष्टं यज्ञपतिं मा यज्ञं जातवेदसौ शिवौ भवतमद्य नः

अग्निनाग्निः संसृज्यते कविर्बृहस्पतिर्युवा
हव्यवाड्जुह्वास्यः

त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्सता
सखा सख्या समिध्यमे

पाहि नो अग्न एकया पाहि न उत द्वितीयया
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो

समीची माहनी पातामायुष्मत्या ऋचो मा सत्सि
तनूपात्साम्नो वसुविदं लोकमनुसंचराणि २

रुक्मं कर्त्रे दद्यात् ३ सा तत्र प्रायश्चित्तिः ४ १६ १०८

अथ यत्रैतदयमसूर्यमौ जनयति तां शान्त्युदकेनाभ्युन्दय दोहयित्वा १ तस्या एव गोर्दुग्धे स्थालीपाकं श्रपयित्वा २ प्राञ्चमिध्ममुपसमाधाय ३ परिसमुह्य पर्युन्दय परिस्तीर्य बर्हिरुदपात्रमुपसाद्य ४ एकैकयैषा सृष्ट्या सं बभूवेत्येतेन सूक्तेनाज्यं जुह्वन् ५ उदपात्रे संपातानानयति ६ उत्तमं संपातमोदने प्रत्या-नयति ७ ततो गां च प्राशयति वत्सौ चोदपात्रादेनानाचामयति च संप्रोन्दति च ८ तां तस्यैव दद्यात् ९ सा तत्र प्रायश्चित्तिः १० १७ १०९

अथ चेद्वडवा वा गर्दभी वा स्यादेवमेव प्राञ्चमिध्ममुपसमाधाय १ एवं परिस्तीर्य २ एवमुपसाद्य ३ एतेनैव सूक्तेनाज्यं जुह्वन् ४ उदपात्रे संपा-तानानयति ५ उदपात्रादेनानाचामयति च संप्रोन्दति च ६ तां तस्यैव दद्यात् ७ सा तत्र प्रायश्चित्तिः ८ १८ ११०

अथ चेन्मानुषी स्यादेवमेव प्राञ्चमिध्ममुपसमाधाय १ एवं परिस्तीर्य २ एवमुपसाद्य ३ उपस्थे जातकावाधाय ४ एतेनैव सूक्तेनाज्यं जुह्वन् ५ अमीषां मूर्ध्नि स मातुः पुत्रयोरित्यनुपूर्वं संपातानानयति ६ उदपात्र उत्तरा-न्संपातान् ७ उदपात्रादेनानाचामयति च संप्रोन्दति च ८ तां तस्यैव दद्यात् ९ सा तत्र प्रायश्चित्तिः १० तस्या निष्क्रयो यथार्हं यथासंपद्वा ११ १९ १११

अथ यत्रैतद्धेनवो लोहितं दुहते यः पौरुषेयेण क्रविषा समङ्क्त इत्येताभिश्चत-

सृभिर्जुहुयात् १ वरां धेनुं कर्त्रे दद्यात् २ सा तत्र प्रायश्चित्तिः ३ २० ११२

अथ यत्रैतदनड्वान्धेनुं धयति तत्र जुहुयात् १

अनड्वान्धेनुमधयदिन्द्रो गो रूपमाविशत्
स मे भूतिं च पुष्टिं च दीर्घमायुश्च धेहि नः

इन्द्राय स्वाहेति हुत्वा २ मा नो विदन्नमो देववधेभ्य इत्येताभ्यां सूक्ताभ्यां जुहुयात् ३ सा तत्र प्रायश्चित्तिः ४ २१ ११३

अथ यत्रैतद्धेनुर्धेनुं धयति तत्र जुहुयात् १

योगक्षेमं धेनुं वाजपत्नीमिन्द्राग्निभ्यां प्रेषिते जञ्जभाने
तस्मान्मामग्ने परि पाहि घोरात्प्र नो जायन्तां मिथुनानि रूपशः

इन्द्राग्निभ्यां स्वाहेति हुत्वा २ दिव्यो गन्धर्व इति मातृनामभिर्जुहुयात् ३ सा तत्र प्रायश्चित्तिः ४ २२ ११४

अथ यत्रैतद्गौर्वाश्वो वाश्वतरो वा पुरुषो वाकाशफेनमवगन्धयति तत्र जुहुयात् १

पयो देवेषु पय ओषधीषु पय आशासु पयोऽन्तरिक्षे
तन्मे धाता च सविता च धत्तां विश्वे तद्देवा अभिसंगृणन्तु

पयो यदप्सु पय उस्त्रियासु पय उत्सेषूत पर्वतेषु
तन्मे धाता च सविता च धत्तां विश्वे तद्देवा अभिसंगृणन्तु

यन्मृगेषु पय आविष्टमस्ति यदेजति पतति यत्पतत्रिषु तन्मे धाता च सविता च धत्तां विश्वे तद्देवा अभिसंगृणन्तु

यानि पयांसि दिव्यार्पितानि यान्यन्तरिक्षे बहुधा बहूनि । तेषामीशानं वशिनी नो अद्य प्रदत्ता द्यावापृथिवी अहृणीयमाना इत्येतेन सूक्तेन जुहुयात्

२ सा तत्र प्रायश्चित्तिः ३ २३ ११५

अथ यत्रैतत्पिपीलिका अनाचाररूपा दृश्यन्ते तत्र जुहुयात् १ भुवाय स्वाहा भुवनाय स्वाहा भुवनपतये स्वाहा भुवां पतये स्वाहावोषाय स्वाहा विनताय स्वाहा शतारुणाय स्वाहा २

यः प्राच्यां दिशि श्वेतपिपीलिकानां राजा तस्मै स्वाहा
यो दक्षिणायां दिशि कृष्णपिपीलिकानां राजा तस्मै स्वाहा
यः प्रतीच्यां दिशि रजतपिपीलिकानां राजा तस्मै स्वाहा
य उदीच्यां दिशि रोहितपिपीलिकानां राजा तस्मै स्वाहा
यो ध्रुवायां दिशि बभ्रुपिपीलिकानां राजा तस्मै स्वाहा
यो व्यध्वायां दिशि हरितपिपीलिकानां राजा तस्मै स्वाहा
य ऊर्ध्वायां दिश्यरुणपिपीलिकानां राजा तस्मै स्वाहा ३

ताश्चेदेतावता न शाम्येयुस्तत उत्तरमग्निमुपसमाधाय ४ शरमयं बर्हिरुभयतः परिच्छिन्नं प्रसव्यं परिस्तीर्य ५ विषावध्वस्तमिङ्गिडमाज्यं शाकपलाशेनोत्पूतं बाधकेन स्रुवेण जुहोति ६

उत्तिष्ठत निर्द्रवत न व इहास्त्वित्यञ्जनम्
इन्द्रो वः सर्वासां साकं गर्भानाण्डानि भेत्स्यति
फङ्गताः पिपीलिका इति ७

इन्द्रो वो यमो वो वरुणो वोऽग्निवो वायुर्वः सूर्यो वश्चन्द्रो वः प्रजापतिर्व ईशानो व इति ८ २४ ११६

अथ यत्रैतन्नीलमक्षा अनाचाररूपा दृश्यन्ते तत्र जुहुयात् १

या मत्यैः सरथं यान्ति घोरा मृत्योर्दूत्यः क्रविशः सं बभूवुः
शिवं चक्षुरुत घोषः शिवानां शं नो अस्तु द्विपदे शं चतुष्पदे

शान्तं चक्षुरुत वायसीनां या चासां घोरा मनसो विसृष्टिः

मनसस्पते तन्वा मा पाहि घोरान्मा वि रिक्षि
तन्वा मा प्रजया मा पशुभिर्वायवे स्वाहेति हुत्वा २

वात आ वातु भेषजमित्येतेन सूक्तेन जुहुयात् ३

वात आ वातु भेषजं शंभु मयोभु नो हृदे
प्र ण आयूंषि तार्षत्

उत वात पितासि न उत भ्रातोत नः सखा
स नो जीवातवे कृधि

यददो वात ते गृहे निहितं भेषजं गुहा
तस्य नो धेहि जीवस इत्येतेन सूक्तेन जुहुयात् ४

सा तत्र प्रायश्चित्तिः ५ २५   ११७

अथ यत्रैतन्मधुमक्षिका अनाचाररूपा दृश्यन्ते मधु वात ऋतायत इत्येतेन सूक्तेन जुहुयात् १ सा तत्र प्रायश्चित्तिः २   २६   ११८

अथ यत्रैतदनाज्ञातमद्भुतं दृश्यते तत्र जुहुयात् १

यदज्ञातमनाम्नातमर्थस्य कर्मणो मिथः
अग्ने त्वं नस्तस्मात्पाहि स हि वेत्थ यथायथम्

अग्नये स्वाहा २ वायो सूर्य चन्द्रेति च ३ पुरुषसंमितोऽर्थः कर्मार्थः पुरु-षसंमितः
वायुर्मा तस्मात्पातु स हि वेत्थ यथायथम्

वायवे स्वाहा ४ अग्निर्मा सूर्यो मा चन्द्रो मेति च ५   २७   ११९

अथ यत्रैतद्ग्रामे वावसाने वाग्निशरणे वा समज्यायां वावदीर्येत चतस्रो

धेनव उपक्लृप्ता भवन्ति श्वेता कृष्णा रोहिणी सुरूपा चतुर्थी १ तासामे-तद्द्वादशरात्रं संदुग्धं नवनीतं निदधाति २ द्वादश्याः प्रातर्यत्रैवादोऽवदीर्णं भवति तत उत्तरमग्निमुपसमाधाय ३ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिः श्वेताया आज्येन संनीय ४ अग्निर्भूम्यामिति तिसृभिरभिमन्त्र्यालभ्य ५ अथ जुहुयात् ६ तथा दक्षिणार्धे ७ तथा पश्चार्धे ८ उत्तरार्धे संस्थाप्य वास्तोष्प-त्यैर्जुहुयात् ९ अवदीर्णे संपातानानीय संस्थाप्य होमान् १० अवदीर्णं शा-न्त्युदकेन संप्रोक्ष्य ११ ता एव ब्राह्मणो दद्यात् १२ सीरं वैश्योऽश्वं प्रादेशिको ग्रामवरं राजा १३ सा तत्र प्रायश्चित्तिः १४ २८ १२०

अथ यत्रैतदनुदक उदकोन्मीलो भवति हिरण्यवर्णा इत्यपां सूक्तैर्जुहुयात् १ सा तत्र प्रायश्चित्तिः २ २९ १२१

अथ यत्रैतत्तिलाः समतैला भवन्ति तत्र जुहुयात् १ अनूनाय स्वाहा । अक्षिताय स्वाहा । अपरिमिताय स्वाहा । परिपूर्णाय स्वाहा २ स यं द्विष्यात्तस्याशायां लोहितं ते प्र सिञ्चामीति दक्षिणामुखः प्रसिञ्चेत् ३ ३० १२२

अथ यत्रैतद्रूपां वा हवींषि वा वयांसि द्विपदचतुष्पदं वाभिमृश्यावगच्छेयुर्ये अग्नयो नमो देववधेभ्य इत्येताभ्यां सूक्ताभ्यां जुहुयात् १ सा तत्र प्रायश्चित्तिः २ ३१ १२३

अथ यत्रैतत्कुमारस्य कुमार्या वा द्वावावर्तौ मूर्धन्यौ भवतः सव्यावृदेको दे-शावर्तस्तत्र जुहुयात् १
त्वष्टा रूपाणि बहुधा विकुर्वञ्जनयन्प्रजा बहुधा विश्वरूपाः
स मे करोत्वविपरीतमस्माननुपूर्वं कल्पयतामिहैव
त्वष्ट्रे स्वाहा २

अन्तर्गर्भेषु बहुधा सं तनोति जनयन्प्रजा बहुधा विश्वरूपाः
स मे करोत्वविपरीतमस्माननुपूर्वं कल्पयतामिहैव
त्वष्ट्रे स्वाहा ३

यद्युन्मृष्टं यदि वाभिमृष्टं तिरश्चीनर्थ उत मर्मृजन्ते
शिवं तद्देवः सविता कृणोतु प्रजापतिः प्रजाभिः संविदानः
त्वष्ट्रे स्वाहा ४

सव्यावृत्तान्युत या विश्वरूपा प्रत्यग्वृत्तान्युत या ते परुःषु
तान्यस्य देव बहुधा बहूनि स्योनानि शग्मानि शिवानि सन्तु
त्वष्टे स्वाहेति हुत्वा ५

त्वष्टा मे दैव्यं वच इत्येतेन सूक्तेन जुहुयात् ६ सा तत्र प्रायश्चित्तिः ७ ३२
१२४

अथ यत्रैतद्यूपो विरोहति तत्र जुहुयात् १

यूपो विरोहञ्छतशाखो अध्वरः समावृतो मोहयिष्यन्यजमानस्य लोकान्
वेदाभिगुप्तो ब्रह्मणा परिवृतोऽथर्वभिः शान्तः सुकृतामेतु लोकम्

यूपो ह्यरुक्षद्द्विषतां वधाय न मे यज्ञो यजमानश्च रिष्यात्
सप्तर्षीणां सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धेहि

वनस्पतये स्वाहेति हुत्वा २ वनस्पतिः सह देवैर्न आगन्निति जुहुयात् ३
सा तत्र प्रायश्चित्तिः ४ ३३ १२५

अथ यत्रैतद्दिवोल्का पतति तदयोगक्षेमाशङ्कं भवत्यवृष्ट्याशङ्कं वा १ तत्र राजा भूमिपतिर्विद्वांसं ब्रह्माणं वृणीयात् २ स वृतोऽरण्यस्यार्धमभिव्रज्य तत्र द्वादशरात्रमनुशुष्येत् ३ स खलु पूर्वं नवरात्रमारण्यशाकमूलफलभक्षश्चाथोत्तरं त्रिरात्रं नान्यदुदकात् ४ श्वो भूते सप्त धेनव उपक्लृप्ता भवन्ति श्वेता कृष्णा रोहिणी नीली पाटला सुरूपा बहुरूपा सप्तमी ५ तासामेतद्द्वादशरात्रं संदुग्धं नवनीतं निदधाति ६ द्वादश्याः प्रातर्यत्रैवासौ पतिता भवति तत उत्तरमग्नि-मुपसमाधाय ७ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिः ८ अथामुं नवनीतं सौवर्णे पात्रे विलाप्य सौवर्णेन स्रुवेण रक्षोघ्नैश्च सूक्तैर्यामाहुस्तारकैषा विके-

शीत्येतेन सूक्तेनाज्यं जुह्वन् ९ अवपतिते संपातानानीय संस्थाप्य होमान् १० अवपतितं शान्त्युदकेन संप्रोक्ष्य ११ ता एव ब्राह्मणो दद्यात् १२ सीरं वैश्योऽश्वं प्रादेशिको ग्रामवरं राजा १३ सा तत्र प्रायश्चित्तिः १४ ३४ १२६

अथ यत्रैतद्धूमकेतुः सप्तर्षीनुपधूपयति तदयोगक्षेमाशङ्कमित्युक्तम् १ पञ्च पशवस्तायन्ते वारुणः कृष्णो गौर्वाजो वाविर्वा हरिर्वायव्यो बहुरूपो दिश्यो मारुती मेष्याग्नेयः प्राजापत्यश्च क्षीरौदनोऽपां नप्त्र उद्रः २ उतेयं भूमिरिति त्रिर्वरुणमभिष्टूय ३ अप्सु ते राजन्निति चतसृभिर्वारुणस्य जुहुयात् ४

वायवा रुन्द्धि नो मृगानस्मभ्यं मृगयद्भ्यः
स नो नेदिष्ठमा कृधि वातो हि रशनाकृत इति वायव्यस्य ५

आशानामिति दिश्यस्य ६

प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे
मरुद्भिरग्न आ गहीति मारुतस्य ७

अपामग्निरित्याग्नेयस्य ८ प्रजापतिः सलिलादिति प्राजापत्यस्य ९ अपां सूक्तैर्हिरण्यशकलेन सहोद्रमप्सु प्रवेशयेत् १० प्र हैव वर्षति ११ सर्वस्वं तत्र दक्षिणा १२ तस्य निष्क्रयो यथार्हं यथासंपद्वा १३ ३५ १२७

अथ यत्रैतन्नक्षत्राणि पतापतानीव भवन्ति तत्र जुहुयात् १

यन्नक्षत्रं पतति जातवेदः सोमेन राज्ञेषिरं पुरस्तात्
तस्मान्मामग्ने परि पाहि घोरात्प्र णो जायन्तां मिथुनानि रूपशः

इन्द्राग्निभ्यां स्वाहेति हुत्वा २ सोमो राजा सविता च राजेत्येतेन सूक्तेन जुहुयात् ३

सोमो राजा सविता च राजा भुवो राजा भुवनं च राजा
शर्वो राजा शर्म च राजा त उ नः शर्म यच्छन्तु देवाः

आदित्यैर्नो बृहस्पतिर्भगः सोमेन नः सह
विश्वे देवा उर्वन्तरिक्षं त उ नः शर्म यछन्तु देवाः

उताविद्वान्निष्कृदयाथोस्त्रघ्नी यथायथम्
मा नो विश्वे देवा मरुतो हेतिमिच्छत ४

रुक्मं कर्त्रे दद्यात् ५ सा तत्र प्रायश्चित्तिः ६ ३६ १२८

अथ यत्रैतन्मांसमुखो निपतति तत्र जुहुयात् १

घोरो वज्रो देवसृष्टो न आगन्यद्वा गृहान्घोरमुता जगाम
तन्निर्जगाम हविषा घृतेन शं नो अस्तु द्विपदे शं चतुष्पदे

रुद्राय स्वाहेति हुत्वा २ भवाशर्वौ मृडतं माभि यातमित्येतेन सूक्तेन जुहु-
यात् ३ सा तत्र प्रायश्चित्तिः ४ ३७ १२९

अथ यत्रैतदनग्नाववभासो भवति तत्र जुहुयात् १

या तेऽवदीप्तिरवरूपा जातवेदोऽपेतो रक्षसां भाग एषः
रक्षांसि तया दह जातवेदो या नः प्रजां मनुष्यां सं सृजन्ते

अग्नये स्वाहेति हुत्वा २ अग्नी रक्षांसि सेधतीति प्रायश्चित्तिः ३ ३८ १३०
अथ यत्रैतदग्निः श्वसतीव तत्र जुहुयात् १

श्वेता कृष्णा रोहिणी जातवेदो यास्ते तनूस्तिरश्चीना निर्दहन्तीः श्वसन्तीः
रक्षांसि ताभिर्दह जातवेदो या नः प्रजां मनुष्यां सं सृजन्ते

अग्नये स्वाहेति हुत्वा २ अग्नी रक्षांसि सेधतीति प्रायश्चित्तिः ३ ३९ १३१

अथ यत्रैतत्सर्पिर्वा तैलं वा मधु वा विष्यन्दति यद्यामं चक्रुर्निखनन्त इत्येतेन
सूक्तेन जुहुयात् १ सा तत्र प्रायश्चित्तिः २ ४० १३२

अथ यत्रैतद्ग्राम्योऽग्निः शालां दहत्यपमित्यमप्रतीत्तमित्येतैस्त्रिभिः सूक्तैर्मैश्र-धान्यस्य पूर्णाञ्जलिं हुत्वा १ ममोभा मित्रावरुणा मह्यमापो मधुमदेरय-न्तामित्येताभ्यां सूक्ताभ्यां जुहुयात् २

ममोभा मित्रावरुणा ममोभेन्द्राबृहस्पती
मम त्वष्टा च पूषा च ममैव सविता वशे

मम विष्णुश्च सोमश्च ममैव मरुतो भवन्
सरस्वांश्च भगश्च विश्वे देवा वशे मम

ममोभा द्यावापृथिवी अन्तरिक्षं स्वर्मम
ममोमाः सर्वा ओषधीरापः सर्वा वशे मम

मम गावो ममाश्वा ममाजाश्चावयश्च ममैव पुरुषा भवन्
ममेदं सर्वमात्मन्वदेजत्प्राणद्वशे ममेति ३

अरणी प्रताप्य स्थण्डिलं परिमृज्य ४ अथाग्निं जनयेत् ५

इत एव प्रथमं जज्ञे अग्निराभ्यो योनिभ्यो अधि जातवेदाः । स गायत्र्या त्रिष्टुभा जगत्यानुष्टुभा देवो देवेभ्यो हव्यं वहतु प्रजानन्निति जनयित्वा ६ भवतं नः समनसौ समोकसावित्येतेन सूक्तेन जुहुयात् ७ सा तत्र प्रायश्चित्तिः ८ ४१ १३३

अथ चेदागन्तुर्दहत्येवमेव कुर्यात् १ सा तत्र प्रायश्चित्तिः २ ४२ १३४

अथ यत्रैतद्वंश स्फोटति कपालेऽङ्गारा भवन्त्युदपात्रं बर्हिराज्यं तदादाय १ शालायाः पृष्ठमुपसर्पति २ तत्राङ्गारान्वा कपालं वोपनिदधात्या संतपनात् ३ प्राञ्चमिध्ममुपसमाधाय ४ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुदपात्रमुपसाद्य ५ परिचरणेनाज्यं परिचर्य ६ नित्यान्पुरस्ताद्धोमान्हुत्वाज्यभागौ च ७ अथ जुहोति ८

असौ वै नाम ते मातासौ वै नाम ते पिता
असौ वै नाम ते दूतः स्ववंशमधि तिष्ठति

उत्तमरात्री णाम मृत्यो ते माता तस्य ते अन्तकः पिता
समंदधानस्ते दूतः स्ववंशमधि तिष्ठति

बहवोऽस्य पाशा विततः पृथिव्यामसंख्येया अपर्यन्ता अनन्ताः
याभिर्वशानभिनिदधाति प्राणिनां यान्कांश्चेमान्प्राणभृतां जिघांसन्
स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशं मृत्यवे स्वाहा

बृहस्पतिराङ्गिरसो ब्रह्मणः पुत्रो विश्वे देवाः प्रददुर्विश्वमेजत्
स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशं बृहस्पतय आङ्गिर-
साय स्वाहा

यस्य तेऽन्नं न क्षीयते भूय एवोपजायते
यस्मै भूतं च भव्यं च सर्वमेतत्प्रतिष्ठितम्
स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशमिन्द्राय स्वाहा

मुखं देवानामिह यो बभूव यो जानाति वयुनानां समीपे
यस्मै हुतं देवता भक्षयन्ति वायुनेत्रः सुप्रणीतिः सुनीतिः
स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशमग्नये स्वाहा

यः पृथिव्यां च्यावयन्नेति वृक्षान्प्रभञ्जनेन रथेन सह संविदानः
रसान्गन्धान्भावयन्नेति देवो मातरिश्वा भूतभव्यस्य कर्ता
स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशं वायवे स्वाहा

ब्रह्मचारी चरति ब्रह्मचर्यमृचं गाथां ब्रह्म परं जिगांसन्
तं विघ्ना अनुपरियन्ति सर्वे ये अन्तरिक्षे ये च दिवि श्रितासः
तं विशो अनुपर्यन्ति सर्वाः कर्माणि लोके परिमोहयन्ति
स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेद्शमादित्याय स्वाहा

यो नक्षत्रैः सरथं याति देवः संसिद्धेन रथेन सहं संविदानः
रूपंरूपं कृरावानश्चित्रभानुः सुभानुः
स इमं दूतं नुदतु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशं चन्द्राय स्वाहा

ओषधयः सोमराज्ञीर्यशस्विनीः
ता इमं दूतं नुदन्तु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशमोषधीभ्यः सोमरा-
ज्ञीभ्यः स्वाहा

ओषधयो वरुणराज्ञीर्यशस्विनीः
ता इमं दूतं नुदन्तु वंशपृष्ठात्स मे गच्छतु द्विषतो निवेशमोषधीभ्यो वरुणरा-
ज्ञीभ्यः स्वाहा

अष्टस्थूणो दशपक्षो यदृच्छजो वनस्पते
पुत्रांश्चैव पशूंश्चाभि रक्ष वनस्पते

यो वनस्पतीनामुपतापो बभूव यद्वा गृहान्घोरमुता जगाम
तन्निर्जगाम हविषा घृतेन शं नो अस्तु द्विपदे शं चतुष्पदे

यो वनस्पतीनामुपतापो न आगद्यद्वा यज्ञं नोऽद्भुतमा जगाम
सर्वं तदग्ने हुतमस्तु भागशः शिवान्वयमुत्तरेमाभि वाजान्

त्वष्ट्रे स्वाहेति हुत्वा ९ त्वष्टा मे दैव्यं वच इत्यत्रोदपात्रं निनयति १०
कपालेऽग्निं चादायोपसर्पति ११ सा तत्र प्रायश्चित्तिः १२ ४३ १३५

अथ यत्रैतत्कुम्भोदधानः सक्तुधानी वोखा वानिङ्गिता विकसति तत्र जुहुयात्
१

भूमिर्भूमिमवागान्माता मातरमप्यगात्
ऋध्यास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति २

सदसि सन्मे भूयादिति सक्तूनावपेत् ३ अथ चेदोदनस्यान्नमस्यन्नं मे देह्यन्नं

मा मा हिंसीरिति त्रिः प्राश्य ४ अथ यथाकामं प्राश्नीयात् ५ अथ चेदुदधानः स्यात्समुद्रं वः प्र हिणोमीत्येताभ्यामभिमन्त्र्य ६ अन्यं कृत्वा ध्रुवाभ्यां दृंहयित्वा ७ तत्र हिरण्यवर्णा इत्युदकमासेचयेत् ८ स खल्वेतेषु कर्मसु सर्वत्र शान्त्युदकं कृत्वा सर्वत्र चातनान्यनुयोजयेन्मातृनामानि च ९ सर्वत्र वरां धेनुं कर्त्रे दद्यात् १० सर्वत्र कंसवसनं गौर्दक्षिणा ११ ब्राह्मणान्भक्तेनोपेप्सन्ति १२ यथोद्दिष्टं चादिष्टास्विति प्रायश्चित्तिः प्रायश्चित्तिः १३ ४४ १३६

इत्यथर्ववेदे कौशिकसूत्रे त्रयोदशोऽध्यायः समाप्तः

यथावितानं यज्ञवास्त्वध्यवसेत् १ वेदिर्यज्ञस्याग्नेरुत्तरवेदिः २ उभे प्रागायते किंचित्प्रथीयस्यौ पश्चादुद्यततरे ३ अपृथुसंमितां वेदिं विदध्यात् ४ षट्शमीं प्रागायतां चतुःशमीं श्रोणयाम् ५ त्रीन्मध्ये अर्धचतुर्थानग्रतः ६ त्रयाणां पुरस्तादुत्तरवेदिं विदध्यात् ७ द्विःशमीं प्रागायतामृज्वीमध्यर्धशमीं श्रोणयाम् ८ ग्रीष्मस्ते भूम इत्युपस्थाय ९ वि मिमीष्व पयस्वतीमिति मिमानमनुमन्त्रयते १० बृहस्पते परि गृहाण वेदिं सुगा वो देवाः सदनानि सन्तु । अस्यां बर्हिः प्रथतां साध्वन्तरहिंस्रा णः पृथिवी देव्यस्त्विति परिगृह्णाति ११ यत्ते भूम इति विखनति १२ यत्त ऊनमिति संवपति १३ त्वमस्यावपनी जनानामिति ततः पांसूनन्यतोदाहार्य १४ बृहस्पते परि गृहाण वेदिमित्युत्तरवेदिमोप्यमानां परिगृह्णाति १५ असंबाधं बध्यतो मानवानाभिति प्रथयति १६ यस्याश्चतस्रः प्रदिशः पृथिव्या इति चतुरस्रां करोति १७ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामा दद इति लेखनमादाय यत्राग्निं निधास्यन्भवति तत्र लक्षणं करोति १८ इन्द्रः सीतां नि गृह्णात्विति दक्षिणत आरभ्योत्तरत आलिखति १९ प्राचीमावृत्य दक्षिणतः प्राचीम् २० अपरास्तिस्रो मध्ये २१ तस्यां व्रीहियवावोप्य २२ वर्षेण भूमिः पृथिवी वृतावृतेत्यद्भिः संप्रोक्ष्य २३ यस्यामन्नं व्रीहियवाविति भूमिं नमस्कृत्य २४ अथाग्निं प्रणयेत्

त्वामग्ने भृगवो नयन्तामङ्गिरसः सदनं श्रेय एहि
विश्वकर्मा पुर एतु प्रजानन्धिष्ण्यं पन्थामनु ते दिशामेति २५

भद्रश्रेयःस्वस्त्या वा २६ अग्ने प्रेहीति वा २७ विश्वंभरा वसुधानी प्रतिष्ठेति लक्षणे प्रतिष्ठाप्य २८ अथेध्ममुपसमादधाति २९ अग्निर्भूम्यामोषधी-

ष्वग्निर्दिव ग्रा तपत्यग्निवासाः पृथिव्यसितजूरेतमिध्मं समाहितं जुषाणोऽस्मै क्षत्राणि धारयन्तमग्न इति पञ्चभि स्तरणम् ३० ग्रत ऊर्ध्वं बर्हिषः ३१ त्वं भूमिमत्येष्योजसेति दर्भान्संप्रोक्ष्य ३२ ऋषीणां प्रस्तरोऽसीति दक्षिणतोऽग्ने-र्ब्रह्मासनं निदधाति ३३ पुरस्तादग्नेरुदक्संस्तृणाति ३४ तथा प्रत्यक् ३५ प्रदक्षिणं बर्हिषां मूलानि च्छादयन्तोत्तरस्या वेदिश्रोणेः पूर्वोत्तरतः संस्थाप्य ३६ ग्रहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सीद योऽस्मत्पाकतर इति ब्रह्मास-नमन्वीक्षते ३७ निरस्तः पराग्वसुः सह पाप्मना निरस्तः सोऽस्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति दक्षिणा तृणं निरस्यति ३८ तदन्वालभ्य जपतीदम-हमर्वाग्वसोः सदने सीदाम्यृतस्य सदने सीदामि सत्यस्य सदने सीदामीष्टस्य सदने सीदामि पूर्तस्य सदने सीदामि मामृषदेव बर्हिः स्वासस्थं त्वाध्यासदे-यमूर्णम्रदमनभिशोकम् ३९ विमृग्वरीमित्युपविश्यासनीयं ब्रह्मजपं जपति बृहस्पतिर्ब्रह्मा ब्रह्मसदन ग्रासिष्यते बृहस्पते यज्ञं गोपाय यदुदुद्वत उन्निवतः शकेयम् ४० पातं मा द्यावापृथिवी ग्रघान्न इति द्यावापृथिव्यौ समीक्षते ४१ सविता प्रसवानामिति कर्मणिकर्मण्यभितोऽभ्यातानैराज्यं जुहुयात् ४२ व्याख्यातं सर्वपाकयज्ञियं तन्त्रम् ४३ १ १३७

ग्रष्टकायामष्टकाहोमाञ्जुहुयात् १ तस्या हवींषि धानाः करम्भः शष्कुल्यः पुरोडाश उदौदनः क्षीरौदनस्तिलौदनो यथोपपादिपशुः २ सर्वेषां हविषां समुद्धृत्य ३ दर्व्या जुहुयात्प्रथमा ह व्युवास सेति पञ्चभिः ४ ग्रायमा-गन्संवत्सर इति चतसृभिर्विज्ञायते ५ ऋतुभ्यस्त्वेति विग्राहमष्टौ ६ इन्द्रपुत्र इत्यष्टादशीम् ७ ग्रहोरात्राभ्यामित्यूनविंशीम् ८ पशावुपपद्यमाने दक्षिणं बाहुं निर्लोमं सचर्मं सखुरं प्रक्षाल्य ९ इडायास्पदमिति द्वाभ्यां विंशीम् १० ग्रनुपपद्यमान ग्राज्यं जुहुयात् ११ हविषां दर्विं पूरयित्वा पूर्णा दर्व इति सदर्वीमेकविंशीम् १२ एकविंशतिसंस्थो यज्ञो विज्ञायते १३ सर्वा एव यज्ञतनूरवरून्द्धे सर्वा एवास्य यज्ञतनूः पितरमुपजीवन्ति य एवमष्टकामुपैति १४ न दर्विहोमे न हस्तहोमे न पूर्णहोमे तन्त्रं क्रियेतेत्येके १५ ग्रष्टकायां क्रियेतेतीषुफालिमाठरौ १६ २ १३८

ग्रभिजिति शिष्यानुपनीय श्वो भूते संभारान्संभरति १ दधिसक्तून्पालाशं दण्डमहते वसने शुद्धमाज्यं शान्ता ग्रोषधीर्नवमुदकुम्भम् २ बाह्यतः

शान्तवृक्षस्येध्मं प्राञ्चमुपसमाधाय ३ परिसमुह्य पर्युक्ष्य परिस्तीर्य बर्हिरुद-पात्रमुपसाद्य परिचरणेनाज्यं परिचर्य ४ नित्यान्पुरस्ताद्धोमान्हुत्वाज्यभागौ च ५ पश्चादग्नेर्दधिसक्तूञ्जुहोत्यग्नये ब्रह्मप्रजापतिभ्यां भृग्वङ्गिरोभ्य उशनसे का-व्याय ६ ततोऽभयैरपराजितैर्गणकर्मभिर्विश्वकर्मभिरायुष्यैः स्वस्त्ययनैराज्यं जुहुयात् ७ मा नो देवा अहिर्वधीदरसस्य शर्कोटस्येन्द्रस्य प्रथमो रथो यस्ते सर्पो वृश्चिकस्तृष्टदंश्मा नमस्ते अस्तु विद्युत आरेऽसावस्मदस्तु यस्ते पृथु स्तनयित्नुरिति संस्थाप्य होमान् ८ प्रतिष्ठाप्य स्रुवं दधिसक्तून्प्राश्याच-म्योदकमुपसमारभन्ते ९ अव्यचसश्चेति जपित्वा सावित्रीं ब्रह्म जज्ञानमित्येकां त्रिषप्तीयं च पच्छो वाचयेत् १० शेषमनुवाकस्य जपन्ति ११ योयो भोगः कर्तव्यो भवति तंतं कुर्वते १२ स खल्वेतं पक्षमपक्षीयमाणः पक्षमनधीयान उपश्राम्येता दर्शात् १३ दृष्टे चन्द्रमसि फल्गुनीषु द्व्यान्रसानुपसादयति १४ विश्वे देवा अहं रुद्रेभिः सिंहे व्याघ्रे यशो हविर्यशसं मेन्द्रो गिरावरागराटेषु यथा सोमः प्रातःसवने यच्च वर्चो अक्षेषु येन महानघ्न्या जघनं स्वाहेत्यग्नौ हुत्वा १५ रसेषु संपातानानीय संस्थाप्य होमान् १६ तत एतान्प्राशयति रसान्मधुघृताञ्छिष्यान् १७ योयो भोगः कर्तव्यो भवति तंतं कुर्वते १८ नान्यत आगताञ्छिष्यान्परिगृह्णीयात्परसंदीक्षितत्वात् १९ त्रिरात्रोनांश्चतुरो मासाञ्छिष्येभ्यः प्रब्रूयादर्धपञ्चमान्वा २० पादं पूर्वरात्रेऽधीयानः पादमपररात्रे मध्यरात्रे स्वपन् २१ अभुक्त्वा पूर्वरात्रेऽधीयान इत्येके २२ यथाशक्त्यपररात्रे दुष्परिमाणो ह पादः २३ पौष्यस्यापरपक्षे त्रिरात्रं नाधीयीत २४ तृतीयस्याः प्रातः समासं संदिश्य यस्मात्कोशादित्यन्तः २५

यस्मात्कोशादुदभराम वेदं तस्मिन्नन्तरव दध्म एनम्
अधीतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसावतेहेति २६

योयो भोगः कर्तव्यो भवति तंतं कुर्वते २७ ये परिमोक्षं कामयन्ते ते परि-मुच्यन्ते २८ ३ १३९

अथ राज्ञामिन्द्रमहस्योपाचारकल्पं व्याख्यास्यामः १ प्रोष्ठपदे शुल्कप-क्षेऽश्वयुजे वाष्टम्यां प्रवेशः २ श्रवणेनोत्थापनम् ३ सम्भृतेषु मंभारेषु ब्रह्मा राजा चोभौ स्नातावहतवसनौ सुरभिणौ व्रतवन्तौ कर्मण्यावुपवसतः ४ श्वो

भूते शं नो देव्याः पादैरर्धर्चाभ्यामृचा षट्कृत्वोदकमाचामतः ५ अर्वाञ्चमिन्द्रं त्रातारमिन्द्रः सुत्रामेत्याज्यं हुत्वा ६ अथेन्द्रमुत्थापयन्ति ७ आ त्वाहार्षं ध्रुवा द्यौर्विशस्त्वा सर्वा वाञ्छन्त्विति सर्वतोऽप्रमत्ता धारयेरन् ८ अद्भुतं हि विमानोत्थितमुपतिष्ठन्ते ९ अभिभूर्यज्ञ इत्येतैस्त्रिभिः सूक्तैरन्वारब्धे राजनि पूर्णहोमं जुहुयात् १० अथ पशूनामुपाचारम् ११ इन्द्रदेवताः स्युः १२ ये राज्ञो भृत्याः स्युः सर्वे दीक्षिता ब्रह्मचारिणः स्युः १३ इन्द्रं चोपसद्य यजेरंस्त्रिरात्रं पञ्चरात्रं वा १४ त्रिरयनमह्नामुपतिष्ठन्ते हविषा च यजन्ते १५ आवृत इन्द्रमहमिति १६ इन्द्र क्षत्रमिति हविषो हुत्वा ब्राह्मणान्परिचरेयुः १७ न संस्थितहोमाञ्जुहुयादित्याहुराचार्याः १८ इन्द्रस्यावभृथादिन्द्रमवभृथाय व्रजन्ति १९ अपां सूक्तैराप्लुत्य प्रदक्षिणमावृत्याप उपस्पृश्यानवेक्षमाणाः प्रत्युदाव्रजन्ति २० ब्राह्मणान्भक्तेनोपेप्सन्ति २१ श्वःश्वोऽस्य राष्ट्रं ज्यायो भवत्येकोऽस्यां पृथिव्यां राजा भवति न पुरा जरसः प्रमीयते य एवं वेद यश्चैवं विद्वानिन्द्रमहेण चरति २२ ४ १४०

अथ वेदस्याध्ययनविधिं वक्ष्यामः १ श्रावण्यां प्रौष्ठपद्यां वोपाकृत्यार्धपञ्चमान्मासानधीयीरन् २ एवं छन्दांसि ३ लोम्नां चानिवर्तनम् ४

अर्धमासं चोपाकृत्य क्षपेरंस्त्र्यहमुत्सृज्य
आरम्भः श्रावण्यामुक्तः पौष्यामुत्सर्ग उच्यते ५

अथानध्यायान्वक्ष्यामः ६ ब्रह्मज्येषु निवर्तते ७ श्राद्धे ८ सूतकोत्थानच्छर्दनेषु त्रिषु चरणम् ९ आचार्यास्तमिते वा येषां च मानुषी योनिः १० यथाश्राद्धं तथैव तेषु ११ सर्वं च श्राद्धिकं द्रव्यमदसाहव्यपेतं प्रतिगृह्यानध्यायः १२ प्राणि चाप्राणि च १३ दन्तधावने १४ क्षुरसंस्पर्शे १५ प्रादुष्कृतेष्वग्निषु १६ विद्युतार्धरात्रे स्तनिते १७ सप्तकृत्वो वर्षेण विरत आप्रातराशम् १८ वृष्टे १९ निर्घाते २० भूमिचलने २१ ज्योतिषोपसर्जन ऋतावप्याकालम् २२ विषमे न प्रवृत्तिः २३

अथ प्रमाणं वक्ष्यामः समानं विद्युदुल्कयोः
मार्गशीर्षपौषमाघापरपक्षेषु तिस्रोऽष्टकाः २४

अमावास्यायां च २५ त्रीणि चानध्यानि २६

जनने मरणे चैव दशरात्रो विधीयते
आचार्ये दशरात्रं स्यात्सर्वेषु च स्वयोनिषु २७

सूतके त्वेको नाधीयीत त्रिरात्रमुपाध्यायं वर्जयेत् २८ आचार्यपुत्रभार्याश्च २९ अथ शिष्यं सहाध्यायिनमप्रधानगुरुं चोपसन्नमहोरात्रं वर्जयेत् ३० तथा सब्रह्मचारिणं राजानं च ३१ अपर्तुदैवमाकालम् ३२

अविशेषर्तुकालेन सर्वे निर्घातादयः स्मृताः
यच्चान्यद्दैवमद्भुतं सर्वं निर्घातवद्भवेत् ३३

ऋतावध्यायश्छान्दसः काल्प्य आपर्तुकः स्मृतः
ऋतावूर्ध्वं प्रातराशाद्यस्तु कश्चिदनध्यायः
संध्यां प्राप्नोति पश्चिमाम् ३४

सर्वेण प्रदोषो लुप्यते ३५ निशि निगदायां च विद्युति शिष्टं नाधीयीत ३६

अस्तमिते द्विसत्तायां त्रिसत्तायां च पाटवः
अथ तावत्कालं भुक्त्वा पदोष उभे संध्ये ३७

अप्सु श्मशाने शय्यायामभिशस्ते खिलेषु च
अन्तःशवे रथ्यायां ग्रामे चाण्डालसंयुते ३८

दुर्गन्धे शूद्रसंश्रावे पैङ्गे शब्दे भये रुते
वैधृत्ये नगरेषु च ३९

अनिक्तेन च वाससा चरितं येन मैथुनम्
शयानः प्रौढपादो चाग्रतोपस्थान्तिके गुरोः ४०

विरम्य मारुते शीघ्रे प्रत्यारम्भो विभाषितः

सर्वेणापररात्रेण विरम्य प्रत्यारम्भो न विद्यते ४१

पौषी प्रमाणमभ्रेष्वापर्तु चेदधीयानाम् ४२ वर्षं विद्युत्स्तनयित्नुर्वा विपद्यते ४३ त्रिरात्रं स्थानासनं ब्रह्मचर्यमरसाशं चोपेयुः ४४ सा तत्र प्रायश्चित्तिः सा तत्र प्रायश्चित्तिः ४५ ५ १४१

इत्यथर्ववेदे कौशिकसूत्रे चतुर्दशोऽध्यायः समाप्तः
इति कौशिकसूत्रं समाप्तम्